Digitized by eGangotri and Sarayu Trust.

PREFATORY NOTE.

Sometime ago the University of Allahabad took the long-deferred step of providing co-ordinated courses of study for the B.A. Examination. As a part of this scheme, the Gupta Inscriptions have been prescribed in co-ordination with Ancient Indian History. These Inscriptions, however, have been available only in the costly volumes published by the Archæological Department of the Government of India. As the cost of these would be beyond the means of the ordinary Indian undergraduate, the enterprising Proprietor of The Belvedere Press, undertook their publication, and through the kind intercession of the U. P. Government, secured the sanction for reprinting the Inscriptions from the Government of India. The task of seeing the publication though the Press fell to me, simply because I was the man available on the spot. I am afraid there is still left much to be desired in the way of editorial precision; for this reason, this first edition of the reprint has been limited to a very few copies, and it is hoped that the later edition will be a much improved one.

"Notes," and "Aids" have been intentionally eschewed. For these the serious student should always turn to the living professor, without whose help all "aids" are wooden and lifeless.

MUIR CENTRAL COLLEGE,
Allahabad.

GANGANATHA JHA.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

LIST OF CONTENTS.

PAGES.

1. Allahabad Posthumous Stone Pillar Inscription ... ... 1—3
2. Eran Stone Inscription of Samudragupta ... ... 4—5
3. Udayagiri Cave Inscription of Chandragupta II 5
4. Mathura Stone Inscription of Chandragupta II 5
5. Sanchi Stone Inscription of Chandragupta II 6
6. Udayagiri Cave Inscription of Chandragupta II ... ... 6—7
7. Gadhwa Stone Inscription of Chandragupta II 7
8. Gadhwa Stone Inscription of Kumaragupta ... ... 7—8
9. Gadhwa Stone Inscription of Kumaragupta 8
10. Bilsad Stone Pillar Inscription of Kumaragupta ... ... 8—9
11. Mankuwar Stone Image Inscription of Kumaragupta 9
12. Bihar Stone Pillar Inscription of Skandagupta ... ... 9—11

CC-0. In Public Domain. Funding by IKS

Digitized by eGangotri and Sarayu Trust.

13. Bhitari Stone Pillar Inscription of Skandagupta ... ... 12—13
14. Junagadh Rock Inscription of Skandagupta ... ... 14—19
15. Kahaum Stone Pillar ,, ,, ... 19
16. Indore Copper-Plate ,, ,, ... 20
17. Gangdhar Stone Inscription of Viswavarman ... ... 21—23
18. Mandasore Stone Inscription of Kumaragupta and Bandhuvarman ... 24—28
19. Iran Stone Pillar Inscription of Budhagupta ... ... 28—29
20. Eran Posthumous Stone Pillar Inscription of Goparaja 29
21. Khoh Copper-Plate Inscription of the Maharaja Hastin ... ... 29—30
22. Do. do. do. ... 31—32
23. Majhgawan Copper-Plate ,, ,, ,, ... 32—34
24. Bhumara Stone Pillar Inscription of the Maharajas Hastin and Sarvanatha 34
25 Khoh Copper-Plate Inscription of the Maharaja Samkshobha ... ... 34—35
26. Kantalai Copper-Plate Inscription of the Maharaja Jayanatha... ... 36—37
27. Do. do. do. ... 37—38
28. Khoh Copper-Plate Inscription of the Maharaja Sarvanatha ... ... 39—40

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

29. Khoh Copper-Plate Inscription of the Maharaja Sarvanatha ... ... 40—41

30. Do. do. do. ... 41—42

31. Do. do. do. ... 42—44

32. Meharauli Posthumous Iron Pillar Inscription of Chandra 44

33. Mandasor Stone Pillar Inscription of Yasodharman ... ... 44—46

34. Do. Duplicate do. ... 46

35. Mandasor Stone Pillar Inscription of Yasodharman and Vishnuvardhana ... 47—50

36. Eran Stone Boar Inscription of Toramana 51

37. Gwalior Stone Inscription of Mihirakula ... ... 51—53

38. Maliya Copper-Plate Inscription of Dharaseva II ... ... 53—55

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

I.

Allahabad Posthumous Stone Pillar Inscription of Samudragupta.

Date:—Middle of the 4th Century A. D.

यः कुल्यैः स्वै...............आतस.........यस्य (?)
.... ॥ १ ॥
पुंव (?)...............त्र.........स्फारद्ध (?)......न्तः स्फुटोद्ध्वंसित
...............प्रवितत ....॥ २॥
यस्य प्रज्ञानुषङ्गोचितसुखमनसः शास्त्रतत्त्वार्थभर्तुः
(— —) स्तब्धो [˘ — — ˘] नि [˘ ˘ ˘ ˘ — —] नोच्छ्रि [— ˘ — —]।
सत्काव्यश्रीविरोधान् बुधगुणितगुणाज्ञाहतानेव कृत्वा
विद्वल्लोके वि [— —] स्फुटबहुकविता कीर्त्तिराज्यं भुनक्ति ॥ ३ ॥

आर्य्यो हीत्युपगुह्य भावपिशुनैरुत्कर्णितै रोमभिः
सभ्येषूच्छ्वसितेषु तुल्यकुलजम्लानाननोद्वीक्षितः ।
स्नेहव्यालुलितेन बाष्पगुरुणा तत्त्वेक्षिणा चक्षुषा
यः पित्राभिहितो निरीक्ष्यनिखिलाम् पाह्येवमूर्व्वीमिति ॥ ४ ॥

दृष्ट्वा कर्म्माण्यनेकान्यमनुजसदृशान्यद्भुतोद्भिन्नहर्षा
भावैरास्वादय [— ˘ ˘ ˘ ˘ ˘ ˘ — — ˘ — —] केचित् ।
वीर्य्योत्तप्ताश्च केचिच्छरणमुपगता यस्यवृत्ते प्रणामे
ध्यार्त्तं (?) [— — ˘ — — ˘ ˘ ˘ ˘ ˘ — — ˘ — — ˘ — ˘] ॥ ५ ॥

संग्रामेषु स्व भुजविजिता नित्यमुच्छापकाराः
श्वः श्वो मानप्र [˘ ˘ ˘ ˘ — — ˘ — — ˘ — —] ।
तोषोत्तुङ्गैः स्फुटबहुरसस्नेहफुल्लैर्मनोभिः
श्चात्तापंव [˘ ˘ ˘ ˘ — — ˘] म म (?) स्या द्वस (?) न्तम् ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उद्वेलोदितबाहुवीर्य्यरभसादेकेन येन क्षणा—
दुन्मूल्याच्युतनागसेन ग (˘˘— –– —˘— — ˘—)
दण्डैर्ग्राहयतैव कोटकुलजम्पुष्पाह्वये क्रीडता
सूर्य्येने (˘˘—˘—) तट (˘– – –˘– –˘—) ॥ ७ ॥

धर्म्मप्राचीरबन्धः शशिकरशुचयः कीर्त्तयः सप्रताना
वैदुष्यं तत्त्वभेदिप्रशम (˘˘˘) उकु (—) य क (˘)
मु (?) त् (– ˘) तार्थम् ।
अध्येयः सूक्तमार्गः कविमतिविभवोत्सारणं चापि काव्यम्
कोनुस्याद्योऽस्यनस्याद्गुणमतिविदुषां ध्यानपात्रम् य एकः ॥ ८ ॥

तस्य विविधसमरशतावतरणदक्षस्य स्वभुजबलपराक्रमैकबन्धोः पराक्रमाङ्कस्य परशुशरशङ्कुशक्तिप्रासासितोमरभिंदिपालनाराचवैतस्तिकाद्यनेकप्रहरणविरूढाकुलव्रणशताङ्कशोभासमुदयोपचितकान्ततरवर्ष्मणः कौसलकमहेन्द्रमाहाकान्तारकव्याघ्रराजकौरालकमंटराजपैष्टपुरकमहेन्द्रगिरिकौट्टूरकस्वामिदत्तैरंडपल्लकदमनकांचेयकविष्णुगोपावमुक्तकनीलराजवैङ्गेयकहस्तिवर्म्म पालक्ककोग्रसेनदैवराष्ट्रककुबेरकौस्थलपुरकधनंजयप्रभृति सर्वदक्षिणापथराजग्रहणमोक्षानुग्रहजनितप्रतापोन्मिश्रमाहाभाग्यस्य रुद्रदेवमतिलनागदत्तचन्द्रवर्म्मगणपतिनागनागसेनाच्युतनन्दिबलवर्म्माद्यनेकार्य्यावर्त्तराजप्रसभोद्धारणोद्वृत्तप्रभावमहतः परिचारकीकृतसर्वाटविकराजस्य समतटडवाककामरूपनेपालकर्तृपुरादिप्रत्यन्तनृपतिभिर्म्मालवार्जुनायनयौधेयमाद्रकाभीरप्रार्जुनसनकानीककाकखरपरिकादिभिश्च सर्वकरदानाज्ञाकरणप्रणामागमन परितोषितप्रचंडशासनस्यानेकभ्रष्टराज्योत्सन्नराजवंशप्रतिष्ठापनोद्भूतनिखिलभुवनविचरणशान्तयशसः दैवपुत्रशाहिशाहानुशाहीशकमुरुंडैः सैंहलकादिभिश्च सर्वद्वीपवासिभिरात्मनिवेदनकन्योपायनदानगरुत्मदङ्कस्वविषयभुक्तिशासनया

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

चनाद्युपायसेवाकृतबाहुवीर्य्यप्रसरधरणिबन्धस्य पृथिव्यामप्रतिरथस्य सुचरितशतालंकृतानेकगुणगणोत्सिक्तिभिश्चरणतलप्रमृष्टान्यनरपतिकीर्त्तेः साध्वसाधूदयप्रलयहेतुपुरुषस्याचिन्त्यस्य भक्त्यवनतिमात्रग्राह्यमृदुहृदयस्यानुकम्पावतोऽनेकगोशतसहस्रप्रदायिनः कृपणदीनानाथातुरजनोद्धरणमंत्रदीक्षाद्युपगतमनसः समिद्धस्य विग्रहवतो लोकानुग्रहस्य धनदवरुणेन्द्रान्तकसमस्य स्वभुजबलविजितोनकनरपतिविभवप्रत्यर्पणानित्यव्यापृतायुक्तपुरुषस्य निशितविदग्धमतिगान्धर्वललितैर्व्रीडितत्रिदशपतिगुरुतुम्बुरनारदादेर्विद्वज्जनोपजीव्यानेककाव्याक्रियाभिः प्रतिष्ठितकविराजशब्दस्य सुचिरस्तोतव्यानेकाद्भुतोदारचरितस्य लोकसमयक्रियानुविधानमात्रमानुषस्य लोकधाम्नो देवस्य महाराजश्रीगुप्तप्रपौत्रस्य महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराजश्रीचन्द्रगुप्तपुत्रस्य लिच्छविदौहित्रस्य महादेव्याम् कुमारदेव्यामुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तस्य सर्व्वपृथ्वीविजयजनितोदयव्याप्तनिखिलावनितलां कीर्तिमितस्त्रिदशपतिभवनगमनावाप्तललितसुखविचरणामाचक्षाण इव भुवो बाहुरयमुच्छ्रितः स्तम्भः ॥ यस्य

प्रदानभुजविक्रमप्रशमशास्त्रवाक्योदयै—
रुपर्य्युपरिसंचयोच्छ्रितमनेकमार्गं यशः ।
पुनाति भुवनत्रयं पशुपतेर्जटान्तर्गुहा—
निरोधपरिमोक्षशीघ्रमिव पांडु गाङ्गं पयः ।

एतच्च काव्यमेषामेव भट्टारकपादानां दासस्य समीपपरिसर्प्पणानुग्रहोन्मीलितमतेः खाद्यटपाकिकस्य महादण्डनायकध्रुवभूतिपुत्रस्य सान्धिविग्रहिककुमारामात्यमहादंडनायकहरिषेणस्य सर्वभूतहितसुखायास्तु ॥ अनुष्ठितंच परमभट्टारकपादानुध्यातेन महादंडनायकतिलभट्टकेन ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

II.

Eran Stone Inscription of Samudragupta, Middle of the 4th Century A. D.

(Lines, 1 to 6 containing the whole of the first verse and the first half of the second, are entirely broken away and lost.)

(— --˘—˘˘ —˘) सुवर्णदाने
(— —) रितानृपतयः पृथुराघवाद्याः ॥ २ ॥
(— —) बभूव धनदान्तकतुष्टिकोप
तुल्यः (˘— ˘)मनयेन समुद्रगुप्तः।
(— —) प्य पार्थिवगणस्सकलः पृथिव्याम्
(— —)स्वराज्यविभवघ्रुतमास्थितोऽभूत् ॥ ३ ॥
(— —) न भक्तिनयविक्रमतोषितेन
योराजशब्दविभवैरभिषेचनाद्यैः।
(— —) नितः परमतुष्टिपुरस्कृतेन
(— —˘) वोनृपतिरप्रतिवार्य्यवीर्य्यः ॥ ४ ॥
(— —) स्य पौरुषपराक्रमदत्तशुल्का
हस्त्य श्वरत्नधनधान्यसमृद्धियुक्ता।
(— —) गृहेषु मुदिता बहुपुत्रपौत्र-
सङ्क्रामणी कुलवधुः व्रतिनी निविष्टा ॥ ५ ॥
यस्योर्ज्जितंसमरकर्म्म पराक्रमेद्धम्
(— —) यशः सुविपुलं परिबम्भ्रमीति।
(— —) णियस्य रिपवश्चरणोर्जितानि ॥ ६ ॥
स्वप्नान्तरेष्वपि विचिन्त्य परित्रसन्ति।
[— —˘—˘˘˘—˘˘—˘— —]
(—)प्तः स्वभोगनगरैरिकिणप्रदेशे।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[— —˘—˘˘˘——˘˘—˘— —]
संस्थापितः स्वयशसः परिबृंहणार्थम् ॥ ७ ॥
[— ——˘—˘˘˘—˘˘—˘— —]
[— —˘] वो नृपतिराह्वयदा (˘— —) ॥

(The rest of the inscription is entirely broken away.)

III.

Udayagiri Cave Inscription of Chandragupta II.
The year 82.

सिद्धम् संवत्सरे ८०—२आषाढमासशुक्लैकादश्याम्। परमभट्टारकमहाराजाधिराजश्रीचन्द्रगुप्तपादानुध्यातस्य महाराजछगलगपौत्रस्य महाराजाविष्णुदासपुत्रस्य सनकानिकस्य महाराज ... ढ(?)घलस्यायं देयधर्म्मः ॥

IV.

Mathura Stone Inscription of Chandragupta II.

— — — — —— — सर्वराजोच्छेत्तुः, पृथिव्यामप्रातिरथस्य चतुरुदधिसलिलास्वादितयशसो धनदवरुणेन्द्रान्तकसमस्य कृतांतपरशोः न्यायागतानेकगोहिरण्यकोटिप्रदस्य चिरोत्सन्नाश्वमेधाहर्त्तुर्म्महाराजश्रीगुप्तप्रपौत्रस्य महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराजश्रीचन्द्रगुप्तपुत्रस्य लिच्छविदौहित्रस्य महादेव्याम् कुमारदेव्यामुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तस्य पुत्रेण तत्परिगृहीतेन महादेव्याम् दत्तदेव्यामुत्पनेन परमभागवतेन महाराजाधिराजश्रीचंद्रगुप्तेन... ... ...

(The rest of the inscription is entirely broken away and lost.)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

V.

Sanchi Stone Inscription of Chandragupta II.
The year 93.

सिद्धम्। काकनादबोटश्रीमहाविहारे शीलसमाधिप्रज्ञागुण-भावितेन्द्रियाय परमपुण्यक्रि ... ... ताय चतुर्द्दिगभ्यागताय श्रमणपुंगवावस्थायार्य्यसंघाय महाराजाधिराजश्रीचन्द्रगुप्तपाद-प्रसादाप्यायितजीवितसाधनः ...... अनुजीविसत्पुरुषसद्भाववृत्तिम् (?) जगति प्रख्यापयन् अनेकसमरावाप्तविजययशस्पताकः सुकुलिदेशनष्टी ... ... वास्तव्य उन्दानपुत्राम्रकार्द्दवो मजशर-भंगाम्रातराजकुलमूल्यकृतं (?) .. ... य ... ईश्वर-वासकं पञ्चमंडल्याम् प्रणिपत्य ददाति पंचविंशतीश्च (तिञ्च) दीना रान्। दत्त ... ... याद्र्ढेन महाराजाधिराजश्रीचन्द्रगुप्त-स्य देवराज इति प्रियानाम् ... ... य तस्य सर्वगुणसम्प-त्तये यावच्चन्द्रादित्यौ तावत्पंचभित्तवो भुंजताम् रत्नगृहे च दीपको ज्वलतु। मम चापरार्धात् पञ्चैव भिक्षवो भुञ्जतां रत्नगृहे च दीपक इति। तदेतत्प्रवृत्तम् य उच्छिन्द्यात् स गोब्रह्महत्यया संयुक्तो भवेत् पंचभिश्चानन्तर्यैरिति॥ सम् ९०—३ भाद्र पद दि० ४॥

— —

VI.

Udayagiri Cave Inscription of Chandragupta II.

सिद्धम्। यदन्तर्ज्योतिरर्क्काभमुर्व्यांम् (— —˘— —)।
[— — — —˘—] व्यापि चन्द्रगुप्ताख्यमद्भुतम्॥१॥
विक्रमावक्रयक्रीता दास्यन्यग्भूतपार्थिवा।
[— — —] मान संरक्ता धर्म्म [— — ˘ — ˘—] ॥२॥
तस्यराजाधिराजर्षेरचिन्त्यो (—˘—) र्मनः।
अन्वयप्राप्तसाचिव्यो व्यापृतसन्धिविग्रहः ॥३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कौत्सश्शाब इति ख्यातो वीरसेनः कुलाख्यया ।
शब्दार्थन्यायलोकज्ञः कविः पाटलिपुत्रकः ॥४॥
कृत्स्नपृथ्वीजयार्थेन राज्ञैवेह सहागतः ।
भक्त्या भगवतः शम्भोर्गुहामेतामकारयत् ॥५॥

VII.

Gadhwa Stone Inscription of Chandragupta II.

The year 88.

First Part.

परमभागवतमहाराजाधिराजश्रीचन्द्रगुप्तराज्य(ज्ये) संवत्सरे ... ... अस्यां दिवसपूर्वायां तिथौ ... ... क मात्रिदास प्रमुख ... ... पुण्याप्यायनार्थम् रचित ... सदा सत्र सामान्य ब्राह्मण ... ... दीनारैर्दशभिः १० ... ॥ यश्चैनं धर्मस्कन्धं व्युच्छिन्द्यात् स पंचमहापातकैः संयुक्तः स्यादिति ॥

Second Part.

परमभागवतमहाराजाधिराजश्रीचन्द्रगुप्तराज्य(ज्ये) संवत्सरे ८०—८ ...... अस्यां दिवसपूर्व्वायाम् तिथौ पाटलिपुत्र ... गृहस्थस्य भार्या य ...... आत्मपुण्योपचयार्थं ...... सदासत्र-सामान्यब्राह्मण ... दीनाराः दश १० ...... ॥ यश्चैनं धर्म्म-स्कन्धं व्युच्छिन्द्यात् स पंचमहापातकैः संयुक्तःस्यादिति ॥

VIII.

Gadhwa Stone Inscription of Kumāragupta.

(*The year* 98.)

जितं भगवता । परमभागवतमहाराजाधिराजश्रीकुमारगुप्त-राज्ये (ज्ये) संवत्सरे ...दिवसे १० अस्यां दिवसपूर्व्वायाम् .... सदा सत्रसामान्य ...... दत्ता: दीनाराः १० त (?) .... ति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

सत्रेच दीनारास्त्रय .... ॥ यश्चैनं धर्म्मस्कन्धं व्युच्छिन्द्यात् स पंचमहापातकैः संयुक्तः स्यादिति ॥

गोविन्दालक्ष्मा ... ...

IX.

Gadhwa Stone Inscription of Kumaragupta. The year 98.

जितम्भगवता । परमभागवतमहाराजाधिराजश्रीकुमारगुप्त राज्य(ज्ये) संवत्सरे ९०—८ अस्यांदिवसपूर्व्वायांतिथौ पट्ट......ने न(?)मा पुण्योपचयार्थम् ......कालीयं स ग्रासत्र...... कस्यतलक-निवंसे (?)··· त्यम् दीनाराः द्वादश ...... स्याङ्कुरोद्धस्तच्छ...... संयुक्तः स्यादिति ॥

X.

Bilsad Stone Pillar Inscription of Kumaragupta. The year 96.

... ... सर्व्वराजोच्छेत्तुः पृथिव्यामप्रतिरथस्य चतुरुदधिस-लिलास्वादितयशसो धनदवरुणेन्द्रांतकसमस्य कृतांतपरशोः न्याया-गतानेकगोहिरण्यकोटिप्रदस्य चिरोत्सन्नाश्वमेधाहर्त्तुः महाराज-श्रीगुप्तप्रपौत्रस्य महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराज-श्रीचन्द्रगुप्तपुत्रस्य लिच्छविदौहित्रस्य महादेव्यां कुमार-देव्यामुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तपुत्रस्य महादेव्यां दत्तदेव्यामुत्पन्नस्य स्वयमप्रतिरथस्य परमभागवतस्य महाराजा-धिराजश्रीचन्द्रगुप्तपुत्रस्य महादेव्यां ध्रुवदेव्यामुत्पन्नस्य महा-राजाधिराजश्रीकुमारगुप्तस्याभिवर्द्धमानविजयराज्येसंवत्सरे षण्ण-वते॥ अस्यां दिवसपूर्व्वायां तिथौ भगवतस्त्रैलोक्यतेजस्संसभारसंतता-द्भुतमूर्तेर्ब्रह्मण्यदेवस्य ... ... निवासिनः स्वामिमहासेनस्या-यतनेऽस्मिन् कार्तयुगाचारसद्धर्म्मवर्त्मानुयायिना ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आत् ''पर्षदा मानितेन ध्रुवशर्म्मणा कर्म महत् कृतेदं ।
कृत्वा [— — आ] भिरामां मुनिवसति [˘ —] स्वर्गसोपानरूपाम्
कौवेराच्छ्रन्द्रबिम्बां स्फटिकमणिदलाभासगौराम् प्रतोलीम् ।
प्रासादाग्राभिरूपां गुणवरभवनं धर्म्मसत्रं यथावत्
पुण्येष्वेवाभिरामां व्रजति शुभमतिस्तातशर्म्मा ध्रुवोस्तु ॥१॥
[—] आ (—) ई (—) स्य (˘—) शुभामृत वरप्रख्यात-
लब्धा भुवि
[—] ए [—] ए भक्तिरहीनसत्त्वसमताकस्तन्न सम्पूजयेत् ।
येनापूर्वविभूतिसंचयचयैः (—) ऐ (—) इ (˘— —˘—):
तेनायंध्रुवशर्म्मणा स्थिरवरस्तम्भोच्छ्रयः कारितः ॥२॥

XI.

Mankuwar Stone Image Inscription of Kumaragupta. The year 129.

ओंनमो बुद्धानाम् । भगवतः सम्यक्सम्बुद्धस्य स्वमताविरुद्धस्य इयंप्रतिमा प्रतिष्ठापिता भिक्षुबुद्धमित्रेण सम्वत् १००—२०—९ महाराजश्रीकुमारगुप्तस्य राज्ये ज्येष्ठमास दि० १०—८ सर्वदुःखप्रहाणार्थम ॥

XII.

Bihar Stone Pillar Inscription of Skandagupta. No date.

First Part.

[— —] नृचन्द्रइन्द्रानुजतुल्यवीर्यो
गुणैरतुल्यः (˘˘—˘— —) ॥
(— —) तस्यापि सूनुर्भुविस्वामिनेयः
ख्यातःस्वकीर्त्या (¯—˘— —) ॥१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(— —) स्वसैवयस्यातुलविक्रमेण
कुमारगुप्तेन (˘—˘— —)।
(— —) पितृंश्च देवांश्च ाह हव्यकव्यैः
सदा नृशंस्यादि (˘—˘— —) ॥२॥
(--˘—) अचीकरद्देवनिकेतमंडलम्
क्षितावनौपम्य (˘—˘—˘—)।
......बटे (?) किलस्तम्भवरोच्छ्रयप्रभासे
तुमगड ... . ॥३॥
...... भिर्वृक्षाणांकुसुमभरानताग्रशुङ्ग(?)व्यालम्बस्तवक...॥४॥
(— —) भद्रार्य्यया भाति गृहम् नवाभ्र
निर्मोकनिर्मु (क्त ˘—˘——) ॥ ५ ॥
(— —) स्कन्दप्रधानैर्भुवि मातृभिश्च
लोकांस्तसुश्य (?) (˘˘— ——) ॥६॥
(— —) यूपो च्छ्रयमेव चक्रे
भद्रार्य्यादि... ... ...।
...... स्कन्दगुप्तवटे अंशानि ३०—५
ताम्र (?) कटाकुःकल ....॥७॥
... ... पितुः स्वमातु-
र्यद्यस्ति हि दुष्कृतम् भजतु तने।
... ... काग्रहारे
अंशानि २ अनन्तसेनेनोप ... ... ॥८॥

Second Part.

सर्वराजोच्छेत्तुःपृथिव्यामप्रतिरथस्य चतुरुदधिसलिलास्वादितयशसो धनदवरुणेन्द्रान्तकसमस्य वृतान्तपरशोः न्यायागतानेकगोहिरण्यकोटिप्रदस्य चिरोत्सन्नाश्वमेधाहर्तुः महाराजश्री-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

गुप्तप्रपौत्रस्य महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराजश्रीचन्द्र-गुप्तपुत्रस्य लिच्छविदौहित्रस्य महादेव्याम् कुमारदेव्यामुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तस्य पुत्रस्तत्परिगृहीतो महादेव्याम् दत्तदेव्यामुत्पन्नः स्वयमप्रतिरथः परमभागवतो महाराजाधिराज-श्रीचन्द्रगुप्तस्य पुत्रस्तत्पादानुध्यातो महादेव्याम् ध्रुवदेव्यामुत्पन्नः परमभागवतो महाराजाधिराजश्रीकुमारगुप्तस्तस्य पुत्रस्तत्पादानु-ध्यातः परमभागवतो महाराजाधिराजश्रीस्कन्दगुप्तः ॥

....

परमभागवतो महाराजाधिराजश्रीस्कन्दगुप्त:—

.....................वैशायिकाजपुरकस! (?) मै (?) ....

.... श्रा .... क ....

अत्तयनीविग्रामक्षेत्रम्—

....क्षि..........

उपरिककुमारामात्य—

....ज्ञिकुल (?):—(?)

वणिजक पादितारिक—

.... आग्रहारिक—

शौल्किक-गौल्मिकासन्याम् श्र (?)—

..................................वासिकादीनस्मत्प्रासादोपजीविनः--

समाज्ञापयामि............वर्म्मणा विज्ञापितोऽस्मि मम पितामहेन

..................................नमे भट्टगुहिलस्वामिना भद्रार्य्यका

.... म्. ग्. प्रति........श्रा आग्रोकय.........

.........नाकय—

(The rest is lost.)

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XIII.

Bhitari Stone pillar Inscription of Skandagupta.

सिद्धम्। सर्वराजोच्छेत्तुः पृथिव्यामप्रतिरथस्य चतुरुदधिसालिलास्वादितयशसो धनदवरुणेन्द्रान्तकसमस्य कृतान्तपरशोः न्यायागतानेकगोहिरण्यकोटिप्रदस्य चिरोत्सन्नाश्वमेधाहर्त्तुर्महाराजश्रीगुप्तप्रपौत्रस्य महाराजश्रीघटोत्कचपौत्रस्य महाराजाधिराजश्रीचन्द्रगुप्तपुत्रस्य लिच्छिविदौहित्रस्य महादेव्याम् कुमारदेव्यामुत्पन्नस्य महाराजाधिराजश्रीसमुद्रगुप्तस्य पुत्रस्तत्परिगृहीतो महादेव्याम् दत्तदेव्यामुत्पन्नः स्वयमप्रतिरथः परमभागवतो महाराजाधिराजश्रीचन्द्रगुप्तस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्याम् ध्रुवदेव्यामुत्पन्नः परमभागवतो महाराजाधिराजश्रीकुमारगुप्तस्तस्य।

प्रथित पृथुमतिस्वभावशक्तेः
पृथुयशसःपृथिवीपतेः पृथुश्रीः।
पितृपरिगतपादपद्मवर्ती
प्रथितयशाः पृथिवीपतिः सुतोऽयम् ॥१॥
जगति भुजबलाड्यो (ढ्यो) गुप्तवंशैकवीरः
प्रथितविपुलधामा नामतः स्कन्दगुप्तः।
सुचरितचरितानां येन वृत्तेन वृत्तम्
न विहतममलात्मा तानधीदा (?) विनीतः ॥२॥
विनयबलसुनीतैर्व्विक्रमेण क्रमेण
प्रतिदिनमभियोगादीप्सितं येन लब्ध्वा।
स्वभिमतविजिगीषाप्रोद्यतानां परेषाम्
प्रणिहित इव लेभे संविधानोपदेशः ॥३॥
विचलितकुललक्ष्मीस्तम्भनायोद्यतेन
क्षितितलशयनीये येन नीता त्रियामा।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

समुदितबलकोशान् पुष्यमित्रांश्च जित्वा
क्षितिपचरणपीठेस्थापितो वामपादः ॥४॥
प्रसभमनुपमैर्विध्वस्तशास्त्रप्रतापै-
र्विन (˘˘) मु (˘— —) क्षान्तिशौर्य्यैर्निरूढम् ।
चरितममलकीर्त्तेर्गीयते यस्य शुभ्रम्
दिशि दिशि परितुष्टैराकुमारं मनुष्यैः ॥५॥
पितरि दिवमुपेते विप्लुतां वंशलक्ष्मीम्
भुजबलविजितारिर्यःप्रतिष्ठाप्य भूयः ।
जितमिति परितोषान्मातरम् सास्त्रनेत्राम्
हतरिपुरिव कृष्णो देवकीमभ्युपेतः ॥६॥
स्वैर्दण्डै (˘˘) रत्यु —) त्प्रचालितम् वंशम्प्रतिष्ठाप्य यो
बाहुभ्यामवनीं विजित्य हि जितेष्वार्तेषु कृत्वा दयाम् ।
नोत्सिक्तो न च विस्मितः प्रतिदिनं संवर्द्धमानद्युतिः
गीतैश्च स्तुतिभिश्च वन्दकजनो य प्रापयत्यार्य्यताम् ॥७॥
हूणैर्यस्य समागतस्य समरे दोर्भ्यां धरा कम्पिता
भीमावर्त्तकरस्य शत्रुषु शरा (— —˘— — —)।
(— — —˘˘—˘—) विरचितम्प्रख्यापितो (—) ई (—)
(—) न द्योति (˘) नभीषुलक्ष्यतइव श्रोत्रेषु गांगध्वनिः ८
स्वपितुः कीर्त्ति (— — —) (— — — —˘— —)।
(————˘————) (———˘—˘—) ॥६॥
कर्त्तव्या प्रतिमा काचित्प्रतिमांतस्य शार्ङ्गिणः ।
सुप्रतीतश्चकारेमाम् यावदाचन्द्रतारकम् ॥१०॥
इह चैनं प्रतिष्ठाप्य सुप्रतिष्ठितशासनः ।
ग्राममेनं स विदधे पितुः पुण्याभिवृद्धये ॥११॥
अतो भगवतो मूर्त्तिरियं यश्चात्र संस्थितः ।
उभयंनिर्द्दिदेशासौ पितुः पुण्याय पुण्यधीः ॥१२॥ इति

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XIV.

Junagadh Rock Inscription of Skandagupta. The years 136, 137, *and* 138.

सिद्धम् ॥

श्रियमभिमतभोग्यां नैककालापनीताम्
त्रिदशपतिसुखार्थं यो बलेराजहार ।
कमलनिलयनायाः शाश्वतं धाम लक्ष्म्याः
स जयति विजितार्तिर्विष्णुरत्यन्तजिष्णुः ॥ १ ॥

तदनु जयति शाश्वत् श्रीपरिक्षिप्तवक्षाः
स्वभुजजनितवीर्य्यो राजराजाधिराजः ।
नरपतिभुजगानां मानदर्प्पोत्फणानाम्
प्रतिकृतिगरुडाज्ञां निर्व्विषीं चावकर्त्ता ॥ २ ॥

नृपतिगुणनिकेतः स्कन्दगुप्तः पृथुश्रीः
चतुरुदधिजलान्तां स्फीतपर्यन्तदेशाम् ।
अवनिमवनतारिर्यश्चकारात्मसंस्थाम्
पितरि सुरसखित्वं प्राप्तवत्यात्मशक्त्या ॥ ३ ॥

अपि च जितमेव तेन प्रथयन्ति यशांसि यस्य ।
रिपवोप्यामूलभग्नदर्पा निर्वचना म्लेच्छदेशेषु ॥ ४ ॥

क्रमेण बुद्ध्यानिपुणं प्रधार्य्य
ध्यात्वा च कृत्स्नान्गुणदोषहेतून् ।
व्यपेत्य सर्वान्मनुजेन्द्रपुत्रान्
लक्ष्मीः स्वयं यं वरयांचकार ॥ ५ ॥

तस्मिन्नृपे शासति नैव कश्चिद्
धर्म्मादपेतो मनुजः प्रजासु ।
आर्त्तो दरिद्रो व्यसनी कदर्य्यो
दंड्यो न वा यो भृशपीडितः स्यात् ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

एवं स जित्वा पृथिवीं समग्राम्
भग्नाग्रदर्पान् द्विषतश्च कृत्वा ।
सर्वेषु देशेषु विधाय गोप्त्रीन्
संचिन्तयामास बहुप्रकारम् ॥ ७ ॥

स्यात्कोऽनुरूपो मतिमान्विनीतो
मेधास्मृतिभ्यामनपेतभावः ।
सत्यार्ज्जवौदार्य्यनयोपपन्नो
माधुर्य्यदाक्षिण्ययशोऽन्वितश्च ॥ ८ ॥

भक्तोनुरक्तो नृविशेषयुक्तः सर्वोपधाभिश्च विशुद्धबुद्धिः ।
आनृण्यभावोपगतान्तरात्मा सर्वस्यलोकस्य हिते प्रवृत्तः ॥ ९ ॥

न्यायार्जनेर्थस्य च कः समर्थः स्यादार्जितस्याप्यथ रक्षणे च ।
गोपायितस्यापि च वृद्धिहेतौ वृद्धस्य पात्रप्रतिपादनाय ॥ १० ॥

सर्वेषु भृत्येष्वपि संहतेषु यो मे प्रशिष्यान्निखिलां सुराष्ट्रान् ।
आम् ज्ञातमेकः खलु पर्णदत्तो भारस्य तस्योद्वहने समर्थः ॥ ११ ॥

एवं विनिश्चित्य नृपाधिपेन नैकानहोरात्रगणान् स्वमत्या ।
यः संनियुक्तोऽर्थनया कथंचित् सम्यक्सुराष्ट्रावनिपालनाय ॥ १२ ॥

नियुज्यदेवा वरुणम् प्रतीच्याम् स्वस्था यथा नोन्मनसो बभूवुः ।
पूर्वेतरस्यांदिशि पर्णदत्तम् नियुज्य राजा धृतिमांस्तथाऽभूत् ॥ १३ ॥

तस्यात्मजो ह्यात्मजभावयुक्तो द्विधेवचात्मात्मवशेन नीतः ।
सर्वात्मनात्मेव च रक्षणीयो नित्यात्मवानात्मजकान्तरूपः ॥ १४ ॥

रूपानुरूपैर्ललितैर्विचित्रैः नित्यप्रमोदान्वितसर्वभावः ।
प्रबुद्धपद्माकरपद्मवक्त्रो नृणां शरण्यः शरणागतानाम् ॥ १५ ॥

अभवद्भुविचक्रपालितोसाविति नाम्ना प्रथितः प्रियो जनस्य ।
स्वगुणैरनुपस्कृतैरुदात्तैः पितरं यश्च विशेषयांचकार ॥ १६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

क्षमाप्रभुत्वं विनयो नयश्च शौर्य्यं विना शौर्य्यमहार्च्चनं च ।
वाक्यं दमो दानमदीनता च दाक्षिण्यमानृण्यमशून्यता च ॥ १७ ॥
सौन्दर्य्यमार्य्येतरनिग्रहश्च अविस्मयो धैर्य्यमुदीर्णता च ।
इत्येवमेतेऽतिशयेन यस्मिन्नविप्रवासेन गुणा वसन्ति ॥ १८ ॥
न विद्यतेऽसौ सकलेऽपि लोके यत्रोपमा तस्य गुणैः क्रियेत ।
स एव कात्स्न्र्येन गुणान्वितानाम् बभूव नृणामुपमानभूतः ॥१९॥
इत्येवमेतानधिकानतोन्यान् गुणान्परीक्ष्य स्वयमेव पित्रा ।
यः सन्नियुक्तो नगरस्य रक्षां विशिष्यपूर्वान् प्रचकार सम्यक् ॥२०॥
आश्रित्य वीर्य्यं सुभुजद्वयस्य स्वस्यैव नान्यस्य नरस्य दर्पम् ।
नोद्वेजयामासचकंचिदेवमस्मिन्पुरे चैव शशास दुष्टान् ॥ २१ ॥
विस्रम्भमल्पेन शशामयोऽस्मिन् कालेन लोकेषु सनागरेषु ।
यो लालयामास च पौरवर्गान् (--˘) पुत्रान् सुपरीक्ष्य दोषान् ॥२२॥
संरंजयां च प्रकृतीर्बभूव पूर्व्वस्मिताभाषणमानदानैः ।
निर्य्यंत्रणान्योऽन्यगृहप्रवेशैः संवर्द्धितप्रीतिगृहोपचारैः ॥ २२ ॥
ब्रह्मण्यभावेन परेण युक्तः शक्तः शुचिर्दानपरो यथावत् ।
प्राप्यान्सकाले विषयान्सिषेवे धर्मार्थयोश्चाप्यविरोधनेन ॥२४॥
यो (—˘——˘˘) पर्णदत्तात्स न्यायवानत्र किमस्ति चित्रम् ।
मुक्ताकलापाम्बुजपद्मशीताचन्द्रात्किमुष्णम् भविता कदाचित् ॥२५॥
अथाक्रमेणाम्बुदकाल आगते निदाघकालं प्रविदार्य्य तोयदैः ।
ववर्ष तोयं वहुसंततं चिरं सुदर्शनं येन विभेद चात्वरात् ॥ २६ ॥
संवत्सराणामधिके शते तु त्रिंशद्भिरन्यैरपि षड्भिरेव ।
रात्रौ दिने प्रौष्ठपदस्य षष्ठे गुप्तप्रकाले गणनां विधाय ॥ २७॥
इमाश्च या रैवतका विनिर्गताः पलाशिनी य ।सिकता।विला।सिनी ।
समुद्रकान्ताश्चिरवन्धनोषिताः पुनः पतिं शास्त्रयथोचितं ययुः ॥२८॥
अवेक्ष्य वर्षागमजं महोद्भ्रमम् महोदधेरूर्जयता प्रियेप्सुना ।
अनेकतीरान्तजपुष्पशोभितो नदीमयो हस्त इव प्रसारितः ॥२९॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विषाद्यमानाः खलु सर्वतो जनाः कथंकथंकार्यमिति प्रवादिनः ।
मिथो हि पूर्वापररात्रमुत्थिता विचिंतयांचापि बभूवुरुत्सुकः ॥३०॥
अपीहलोके सकलं सुदर्शनं पुमान् हि दुर्दर्शनतां गतं क्षणात् ।
भवेन्नु सांभोनिधितुल्यदर्शनं सुदर्शनं [—˘˘——˘—˘—]॥३१॥
[˘—˘— —˘] वणे स भूत्वा पितुः परां भक्तिमपि प्रदर्श्य ।
धर्मं पुरोधाय शुभानुबन्धं राज्ञो हितार्थं नगरस्य चैव ॥ ३२ ॥
संवत्सराणामधिके शते तु त्रिंशद्भिरन्यैरपि सप्तभिश्च ।
प्र [—˘— – ˘˘] शास्त्रचेत्ता विश्वोप्यनुज्ञातमहाप्रभावः॥ ३३॥
आज्यप्रणामैः विबुधानथेष्ट्वा धनैर्द्विजातीनपि तर्पयित्वा ।
पौरांस्तथाभ्यर्च्य यथार्थमानैः भृत्यांश्चपूज्यां सुहृदश्च दानैः ॥३४॥
ग्रैष्मस्य मासस्य तुपूर्वपक्षे [˘—˘— —प्र] थमेह्नि सम्यक्।
मासद्वयेनादरवान् स भूत्वा धनस्य कृत्वाव्ययमप्रमेयम् ॥ ३५ ॥
आयामतो हस्तशतं समग्रं विस्तारतः षष्टिरथापि चाष्टौ ।
उत्सेधतोन्यत् पुरुषाणिसप्त [˘—˘—ह] स्तशतद्वयस्य ॥ ३६ ॥
बबन्ध यत्नान् महतानृदेवान् [अभ्यर्च्य] सभ्यग्घटितोपलेन ।
अजातिदुष्टं प्रथितं तटाकम् सुदर्शनं शाश्वतकल्पकालम् ॥३७॥

अपिचसुदृढसेतुप्रान्तविन्यस्तशोभ-
रथचरणसमाह्वक्रौंचहंसासधूतम् ।

विमलसलिल [–– — —˘— —] ˘— —]
भुवित [˘˘˘ – — —] द [— अ] र्कःशशी च ॥३८॥
नगरमपि च भूयाद्वृद्धिमत्पौरजुष्टम्
द्विजबहुशतगीतब्रह्मनिर्नष्टपापम् ।
शतमपि च समानामीतिदुर्भिक्ष [— —]
[˘˘˘˘˘˘— — —˘— —˘— —] ॥ ३९ ॥
॥ इति सुदर्शनतटाकसंस्कारग्रन्थरचना समाप्ता॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

SECOND PART.

दृप्तारिदर्पप्रणुदः पृथुश्रियः
स्ववंशकेतोः सकलावनीपतेः ।
राजाधिराज्याद्भुतपुण्यकर्मणः
˘–˘– –˘˘–˘–˘ ॥ १ ॥

– –˘– –˘˘–˘– –
[– –˘– –˘˘–˘– –
द्वीपस्य गोप्ता महतां च नेता
दंडाद्वि [—] नां द्विषतां दमाय ॥ २ ॥

तस्यात्मजेनात्मगुणान्वितेन
गोविन्दपादार्पितजीवितेन ।
[– –˘– –˘˘–˘˘– –]
[– –˘– –˘˘–˘– –] ॥ ३ ॥

[– –˘–˘˘˘–˘˘–˘–] ग्यं
विष्णोश्च पादकमले समवाप्य तत्र ।
अर्थव्ययेन महता महता च काले—
नात्माप्रभावनतपौरजनेन तेन ॥ ४ ॥

चक्रं बिभर्त्ति रिपु [–˘˘–˘– –]
[– –˘–˘˘˘–˘˘–˘– –] ।
[– –˘–˘˘˘–˘˘–˘– –]
तस्य स्वतन्त्रविधिकारणमानुषस्य ॥ ५ ॥

कारितमवक्रमतिना चक्रभृतः चक्रपालितेन गृहम् ।
वर्षशतेऽष्टात्रिंशे गुप्तानां काल............ ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

[— —˘—˘˘˘—˘˘—˘— —]
[— — ˘—˘˘˘—˘˘— ˘— —] ।
[— — आ] र्थमुत्थितमिवोर्जयतो चलस्य ।
कुर्वत्प्रभुत्वमिव भाति पुरस्य मूर्ध्नि ॥ ७ ॥
अन्यच्चमूर्धानिसु [—˘˘—˘—]
[- —˘—˘˘˘—˘˘—˘-- —] ।
[— —˘—˘˘˘] रुद्धविहङ्गमार्गम्
विभ्राजते [˘˘˘ ˘˘—˘] ॥ ८ ॥

XV.

Kahaum Stone Pillar Inscription of Skandagupta.

The year 141.

सिद्धम् ।

यस्योपस्थानभूमिर्नृपतिशतशिरःपातवातावधूता
गुप्तानां वंशजस्य प्रविसृतयशसस्तस्य सर्वोत्तमर्द्धेः ।
राज्ये शक्रोपमस्य क्षितिपशतपतेः स्कन्दगुप्तस्य शान्ते
वर्षे त्रिंशद्दशैकोत्तरकशततमे ज्येष्ठमासि प्रपन्ने ॥ १ ॥
ख्यातेऽस्मिन् ग्रामरत्ने ककुभ इतिजनैः साधुसंसर्गपूते
पुत्रो यस्सोमिलस्य प्रचुरगुणनिधेर्भट्टिसोमो महात्मा ।
तत्सूनूरुद्रसोमः पृथुलमतियशाव्याघ्रइत्यान्यसंज्ञो
मद्रस्तस्यात्मजोऽभूद्द्विजगुरुयतिषुप्रायशःप्रीतिमान्यः॥२॥
पुण्यस्कन्धं सचक्रे जगदिदमखिलं संसरद्वीक्ष्य भीतो
श्रेयोऽर्थंभूतभूत्यै पथि नियमवतामर्हतामादिकर्तॄन् ।
पंचेन्द्रांस्थापयित्वा धरणिधरमयान् सन्निखातस्ततोऽयम्
शैलस्तम्भःसुचारुर्गिरिवरशिखराग्रोपमः कीर्त्तिकर्त्ता ॥३॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XVI.

Indor Copper-plate Inscription or Skandagupta.
The year 146.

सिद्धम् !

यं विप्राविधिवत्प्रबुद्धमनसो ध्यानैकतानस्तुवः
यस्यान्तं त्रिदशासुरा न विविदुर्नोर्ध्वन्न तिर्य्यग्गतिम् ।
यंलोको वहुरोगवेगविवशः संश्रुत्यचेतोलभः
पायाद्वः सजगतिपधानपुटभिद्रश्म्याकरो भास्करः ।। १ ॥

परमभट्टारकमहाराजाधिराज श्री स्कन्दगुप्तस्याभिवर्द्धमानाविजय-राज्यसंवत्सरशते षट्चत्वारिंशदुत्तरतमे फाल्गुनमासे तत्पादपरि-गृहीतस्य विषयपतिसर्वानागस्यान्तर्व्वेद्याम् भोगाभिवृद्धये वर्त्तमाने। चन्द्रापुरकपद्माचातुर्विद्यसामान्यब्राह्मणदेवविष्णुर्देवपुत्रो हरित्रात-पौत्रः डुडिकप्रपौत्रः सततागिन्होत्रच्छन्दोगो राणायनीयो वर्षगण-सगोत्रइन्द्रापुरकवणिग्भ्याम् क्षात्रयाचलवर्म्मभ्रुकुंठसिंहाभ्याम-धिष्ठानस्य प्राच्यांदिशीन्द्रपुराधिष्ठानमाडास्यातलग्नमेव प्रतिष्ठा-पितकभगवते सवित्रेदीपोपयोज्यमात्मयशोभिवृद्धये मूल्यं प्रय-च्छति: ॥ इन्द्रपुरनिवासिन्यास्तैलिकश्रेण्या जीवन्तप्रवरायाः इतो-धिष्ठानादपक्रमणसंप्रवेशयथास्थिरायाः आजस्त्रिकं ब्रह्मपतेर्द्विज-मूल्यदत्तमनया तु श्रेण्या यद्भग्नयोगम्प्रथमाह्नावच्छिन्नसंस्थं देयं तैलस्यतुल्येन पलद्वयं तौल्येन २ चन्द्रार्कसमकालीयम् ॥

योविक्रमेद्दायमिमं निवद्धम्
गोघ्नो गुरुघ्नो द्विजघातकः सः ।
तैः पातकैः पंचभिरन्वितोध-
र्गच्छेन्नरः सोपनिपातकैश्च ॥ इति ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XVII.

Gangdhar Stone Inscription of Viswavarman.
The year 480.

[— —˘—˘˘˘—˘˘—˘] मस्य
विष्णोर्भुजस्सुरपतिद्विपहस्तसर्प्प ।
[— —˘—˘˘˘—˘˘—˘— —]
[— —˘—˘˘˘—˘˘—˘— —] ॥ १ ॥

प्रख्यातवीर्य्ययशसांक्षितिपाधिपानाम्
वंशोद्भवो [˘] गतिंवि [˘˘—˘— —] ।
— —˘—˘˘˘—˘˘—˘] कान्तः
श्रीमान्बभूवनरवर्म्मनृपःप्रकाशः ॥ २ ॥

यज्ञैः सुरान् मुनिगणाननियमैरुदारैः
[— —˘—˘˘˘—˘˘—˘— —] ।

माननेनभृत्यजनमप्रतिमेनलोके
योऽतोषयत्सुचरितैश्वजत्समग्रम् ॥ ३ ॥

हस्त्यश्वसाधन [˘-˘˘-˘--] [--˘-˘˘˘] खड्गमरीचिमत्सु ।
संग्राममूर्द्धसुमुखंसमुदीक्ष्य यस्य नाशंप्रयान्त्यरिगणाभयनष्टचेष्टाः॥४॥
तस्यात्मजः [˘˘˘-˘˘-] महात्माबुध्याबृहस्पतिसमस्सकलेन्दुवक्त्रः।
औपम्यभूत इव रामभगीरथाभ्याम् रा [-˘-˘˘˘-] भुविविश्ववर्म्मा॥५॥
धैर्य्येणमेरुमभिजातिगुणेन वैराय मिन्दुंप्रभासमुदयने बलेन विष्णुम्।
संवर्त्तकानलमसह्यतमांच दीप्त्यायोविक्रमेण च सुराधिपतिं विजिग्ये॥६॥
व्यावृत्तमार्ग इवभानुरसह्यमूर्त्तिर्व्यभ्रोदयाधिकतरोज्वलघोरदीप्तिः।
यः शक्यतेनरिपुभिर्भयविह्वलाक्षैरुद्वीक्षितुं त्तणमपिप्रगृहीतशस्त्रः॥७॥
निर्भूषणैरविगतास्रजलार्द्रगंडैर्विच्छिन्नमंडनतयोज्ज्वलनष्टशोभैः ।
यस्यारिकामिनिमुखाम्बुरुहैर्वलस्य पूर्वप्रतापचकितैः क्रियते प्रणामः॥८

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रत्नोद्गमद्युतिविरंजितकूलतालैरुत्रस्तनक्रमकरद्वतफेनमालैः ।
चंडानिलोद्धततरंगसमस्तहस्तैर्यस्यार्णवैरपि बलानि नमःक्रियन्ते॥९।

भूरुद्धृतद्रुमाविकम्पितशैलकीलाविन्नस्ताविद्रुतमृगद्विजशून्यगुल्मा ।
यस्योन्नतप्रविशमीकृतराजमार्गास्सैन्यप्रयाणसमयेविनिमज्जतीव।१०।

प्रत्यस्तमौलिमणिरश्मिनखप्रभान्धैरभ्युद्यतांजलितया शबलाग्रगंडैः।
विद्याधरैःप्रियतमाभुजपाशबद्धैर्यस्यादराद्दिवियशांसिनमःक्रियन्ते।११

अग्रेऽपियोवयसि संपरिवर्त्तमानाश्शास्त्रानुसारपरिवर्द्धितशुद्धबुद्धिः।
सद्धर्म्ममार्गमिव राजसुदर्शयिष्यन् रत्नाविधिं भरतवज्जगतःकरोति।१२॥

तस्मिन्प्रशास्तिच महीन्नृपतिप्रवीरे स्वर्गंयथासुरपताविमितप्रभावे ।
नाभूदधर्म्मनिरतोव्यसनान्वितोवा लोकेकदाचनजनस्सुखवर्जितोवा।१३

यातेषुचतुर्षुकृतेषु शतेषु सौम्येष्वशीतसोत्तरपदेष्विह वत्सरेषु ।
शुक्लेत्रयोदशदिनेभुविकार्तिकस्यमासस्यसर्वजनचित्तसुखावहस्य।१४

नीलोत्पलप्रसृतेररावरुणाम्बुकीर्णैबन्धूकबाणकुसुमोज्ज्वलकाननान्ते
निद्राव्यपायसमयेमधुसूदनस्य काले प्रबुद्धकुमुदागरशुद्धतारे ॥ १५॥

वापीतडागसुरसद्मसभोपदाननानाविधोपवनसंक्रमदीर्धिकाभिः ।
सिष्टामिवाभरणजातिभिरङ्गनांस्वांयो गर्गरातटपुरं समलंचकार॥१६।

राज्ञस्त्रितीयमिव चक्षुरुदारवृत्तिर्देवद्विजातिगुरुबान्धवसाधुभक्तः ।
शास्त्रैः स्तुते चविनये व्यवहारहीने योपक्षपातरहिता निदधौस्वाचि-
न्ताम् ॥ १७ ॥

सर्वस्यजीवितमनित्यमसारवच्च दोलाचलामनुविचिन्त्यतथाविभूतिम्।
न्यायागतेन विभवेनपरांचभक्तिं विख्यापयन्नुपरिचक्रगदाधरस्य।१८।

पीनव्यायतवृत्तितम्विसुभुजः खड्गव्रणैरङ्कितः
कर्णान्तप्रतिसर्पमाननयनः श्यामावदातच्छविः ।
दर्पाविष्कृतसारशत्रुमथनो दुष्टाश्व [— -] बली
भक्त्या चासुहृदान् चबान्धवसमो धर्म्मार्थकामोदितः॥१९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रज्ञाशौर्यकुलोद्गतो दिशिदिशि प्रख्यातवीर्य्योवशी
पुत्रेविष्णुभटे तथा हरिभटेसंवद्धवंशक्रियः।
एतत्पापपथावरोधि विपुलः श्रीवल्लभैरात्मजैः
विष्णोः स्थानमकारयद्भगवतः श्री मान्मयूरात्तकः ॥२०॥

कैलासतुङ्गशिखरप्रतिमस्ययस्य दृष्ट्वाकृतिंप्रमुदितैर्वदनारविन्दैः।
विद्याधराःप्रियतमा सहितः सुशोभामादर्शविम्बमिव यान्त्यवलोकयन्त
॥ २१ ॥

यान् दृष्ट्वा सुरसुन्दरीकरतलव्याघृष्टपृष्ठत्तणाम्
प्रत्यावर्त्तनशंकिनोरथहयानाकृष्यचंचत्सटान्।
पुण्योदर्कमतिप्रभावमुनिभिस्संस्तूयमानोऽम्बरे
संराज्यांजलिकुट्मलन्नतशिराभीतः प्रयात्यंशुमान् ॥ २२॥

मातॄणां च प्रमुदितघनात्यर्थनिह्लादिनीनां
तंत्रोद्धूतप्रवलपवनोद्वर्त्तिताम्भोनिधीनाम्।
[— — — — ˘˘] गतमिदं डाकिनीसंप्रकीर्णम्
वेश्मात्युग्रं नृपतिसचिवोऽकारयत्पुण्यहेतोः ॥ २३ ॥

पाताले [˘˘ — ˘ — ˘] रतिभिर्गुप्तं भुजङ्गोपमैः।
शीतस्वादुविशुद्धभूरिसलिलं सोपानमालोज्ज्वलम् ॥
दा [— — ˘˘˘ - - ˘ — ˘] गहनं त्तीरोदधिस्पर्धिनम्
कूपंचैनमकारयद्गुणनिधिः श्री मान् मयूरात्तकः ॥२४॥

यावच्च [— — ˘˘˘˘˘ —] सागरारत्नवन्तो
नानागुल्मद्रुमवनवती यावदुर्व्वी सशैला।
यावच्चेन्दुर्ग्रहगणचितंव्योमभासीकरोति
तावत्कीर्त्तिर्भवतु विपुला श्री मयूरात्तकस्य ॥ २५ ॥

॥ इति सिद्धिरस्तु ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XVIII.

Mandasore Stone Inscription of Kumāragupta and Bandhuvarman.

The Malava years 493 and 529.

सिद्धम् ॥

योवृत्त्यर्थमुपास्यते सुरगणैस्सिद्धैश्च सिद्धार्थिभि—
ध्यानैकाग्रपरैर्विधेयाविषयैर्मोक्षार्थिभिर्योगिभिः ।
भक्त्या तीव्रतपोधनैश्च मुनिभिश्शापप्रसादक्षमै—
र्हेतुर्यो जगतः क्षयाभ्युदययोः पायात्सवोभास्करः ॥१॥

तत्त्वज्ञानविदोपि यस्यन विदुर्ब्रह्मर्षयोभ्युद्यताः
कृत्स्नं यश्चगभस्तिभिः प्रविसृतैः पुष्णातिलोकत्रयम् ।
गन्धर्वामरसिद्धकिन्नरनरैः संस्तूयतेऽभ्युत्थितो
भक्तेभ्यश्च ददाति योऽभिलषितं तस्मै सवित्रेनमः ॥ २ ॥

यः प्रत्यहंप्रतिविभात्युदयाचलेन्द्रविस्तीर्णतुङ्गशिखरस्खलितांशुजालः
क्षीबांगनाजनकपोलतलाभिताम्रःपायात्सवस्सुकिरणाभरणोविवस्वान्३

कुसुमभरानततरुवरदेवकुलसभाविहाररमणीयात् ।
लाटविषयान्नगावृतशैलाज्जगति प्रथितशिल्पः ॥ ४ ॥
तेदेशपार्थिव गुणापहृताः प्रकाशमध्वादिजान्यविरलान्यसुखान्यपास्य।
जातादरादशपुरं प्रथमं मनोभिरन्वागतास्ससुतबन्धुजनास्समेत्य॥५॥
मत्तेभगंडतटविच्युतदानविन्दुसिक्तोपलाचलसहस्रविभूषणायाः ।
पुष्पावनम्रतरुमंडवतंसकाया भूमेः परंतिलकभूतमिदं क्रमेण ॥ ६ ॥
तटोत्थवृक्षच्युतनैकपुष्पविचित्रतीरान्तजलानि भान्ति ।
प्रफुल्लपद्माभरणानियत्र सरांसिकारंडवसंकुलानि ॥ ७ ॥
विलोलवीचीचलितारविन्दपतद्रजःपिंजरितैश्च हंसैः ।
स्वकेसरोदारभरावभुग्नैः क्वचित्सरांस्यम्बुरुहैश्च भान्ति ॥ ८ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

स्वपुष्पभारावनतैर्नगेन्द्रैर्मदप्रगल्भालिकुलस्वनैश्च ।
अजस्रगाभिश्च पुराङ्गनाभिर्वनानि यस्मिन् समलंकृतानि ॥ ९ ॥
चलत्पताकान्यबलासनाथान्यत्यर्थशुक्लान्यधिकोन्नतानि ।
तडिल्लताचित्रसिताभ्रकूटतुल्योपमानानि गृहाणि यत्र ॥ १० ॥
कैलासतुङ्गशिखरप्रतिमानिचान्यान्याभान्तिदीर्घवलभीनिसवेदिकानि।
गान्धर्वशब्दमुखराणि निविष्टचित्रकर्माणिलोलकदलीवनशोभितानि
॥ ११ ॥

प्रासादमालाभिरलंकृतानिधरांविदार्येव समुत्थितानि ।
विमानमालासदृशानि यत्र गृहाणिपूर्णेन्दुकरामलानि ॥ १२ ॥
यच्छात्याभिरम्यसरिद्वयेन चपलोर्मिणा समुपगूढम् ।
रहसिकुचशालिनीभ्यां प्रीतिरतिभ्यां स्मराङ्गमिव ॥ १३ ॥
सत्यक्षमादमशमव्रतशौचशौर्यस्वाध्यायवृत्तविनयस्थितिबुद्ध्युपेतैः ।
विद्यातपोनिधिभिरस्मयितैश्चविप्रैर्यद्भ्राजते ग्रहगणैः खमिवप्रदीप्तैः
॥ १४ ॥

अथ समेत्य निरन्तरसंगतैरहरहः प्रविजृम्भितसौहृदाः ।
नृपतिभिस्सुतवत्प्रतिमानिताः प्रमुदितान्यवसन्तसुखंपुरे ॥ १५ ॥
श्रवणसुभगंधानुर्वेदं दृढंपरिनिष्ठितैः
सुचरितशतासंगाःकेचिद्विचित्रकथाविदः ।
विनयनिभृतासम्यग्धर्म्मप्रसङ्गपरायणाः
प्रियमपुरुषं पथ्यंचान्ये क्षमा बहु भाषितुम् ॥ १६ ॥
केचित्स्वकर्म्मण्यधिकास्तथान्यैर्विज्ञायते ज्योतिषमात्मवद्भिः ।
अद्यापिचान्येसमरप्रगल्भाः कुर्वन्त्यरीणामहितं प्रसह्य ॥ १७ ॥
प्राज्ञामनोज्ञवधवः प्रथितोरुवंशा वंशानुरूपचरिताभरणास्तथान्ये ।
सत्यव्रताः प्रणयिनामुपकारदक्षा विश्रम्भपूर्वमपरेदृढसौहृदाश्च ।१८।
विजितविषयसङ्गैर्धर्म्मशीलैस्तथान्यैर्मृदुभिरधिकसत्त्वैर्लोकयात्रामरैश्च।
स्वकुलतिलकभूतैर्मुक्तरागैरुदारैरधिकमभिविभातिश्रेणिरेवंप्रकारैः।१९

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तारुण्यकान्त्युपचितेऽपिसुवर्णहारताम्बूलपुष्पविधिना समलंकृतोऽपि ।
नारीजनः प्रियमुपैति न तावदग्र्यां यावन्न पट्टमयवस्त्रयुगानि धत्ते ॥ २० ॥
स्पर्शवता वर्णान्तरविभागचित्रेण नेत्रसुभगेन ।
यैस्सकलमिदं क्षितितलमलंकृतं पट्टवस्त्रेण ॥ २१ ॥

विद्याधरीरुचिरपल्लवकर्णपूरवातेरितास्थिरतरं प्रविचिन्त्यलोकम् ।
मानुष्यमर्थनिचयांश्च तथा विशालांस्तेषां शुभा मतिरभूदचलाततस्तु २२
चतुस्समुद्रान्तविलोलमेखलां सुमेरुकैलासबृहत्पयोधराम् ।
वनान्तवान्तस्फुटपुष्पहासिनीं कुमारगुप्ते पृथिवीं प्रशासति ॥ २३ ॥
समानधीश्शुक्रबृहस्पतिभ्यां ललामभूतो भुवि पार्थिवानाम् ।
रणेषु यः पार्थसमानकर्म्मा बभूव गोप्ता नृपविश्ववर्म्मा ॥ २४ ॥
दीनानुकम्पनपरः कृपणार्त्तवर्गसन्धाप्रदोऽधिकदयालुरनाथनाथः ।
कल्पद्रुमः प्रणयिनामभयं प्रदश्च भीतस्य योजनपदस्यचबन्धुरासीत्
॥ २५ ॥

तस्यात्मजः स्थैर्य्यनयोपपन्नो बन्धुप्रियो बन्धुरिवप्रजानाम् ।
बन्ध्वर्त्तिहर्त्ता नृपबन्धुवर्म्मा द्विड्दृप्तपक्षक्षपणैकदक्षः ॥ २६ ॥
कान्तो युवा रणपटुर्विनयान्वितश्च राजापिसन्नुपसृतो न मदैस्मयाद्यैः ।
शृङ्गारमूर्त्तिरभिभात्यनलंकृतोऽपि रूपेण यः कुसुमचाप इव द्वितीयः २७
वैधव्यतीव्रव्यसनक्षतानां स्मृत्वा यमद्याप्यरिसुन्दरीणाम् ।
भयाद्भवत्यायतलोचनानां घनस्तनायासकरः प्रकम्पः ॥ २८ ॥
तस्मिन्नेवक्षितिपतिवृषे बन्धुवर्म्मण्युदारे
सम्यक्स्फीतंदशपुरमिदं पालयत्युन्नतांसे ।
शिल्पावाप्तैर्धनसमुदयैः पट्टवायैरुदारम्
श्रेणीभूतैर्भवनमतुलं कारितं दीप्तरश्मेः ॥ २९ ॥
विस्तीर्णतुङ्गशिखरं शिखरिप्रकाशमभ्युद्गतेन्द्वमलरश्मिकलापगौरम् ।
यद्भातिपश्चिमपुरस्यनिविष्टकान्तचूडामणिप्रतिसमन्नयनाभिरामम्
॥ ३० ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

(रा) मासनाथरचने दरभास्करांशुवह्निप्रतापसुभगे जललीनमीने ।
चन्द्रांशुहर्म्यतलचन्दनतालवृन्तहारोपभोगरहिते हिमदग्धपद्मे
॥ ३१ ॥

रोध्रप्रियङ्गुतरुकुन्दलताविकोशपुष्पासवप्रमुदितालिकलाभिरामे ।
कालेतुषारकणकर्कशशीतवातवेगप्रनृत्तलवलीनगणैकशाखे ॥३२ ॥

स्मरवशगतरुणजनवल्लभांगना विपुलकान्तपीनोरुस्तनजघनघनालि-
ङ्गननिर्भर्त्सिततुहिनाहिमपाते ॥ ३३ ॥

मालवानां गणस्थित्या याते शतचतुष्टये ।
त्रिनवत्यधिकेऽब्दानां ऋतौ सेव्यघनस्वने ॥ ३४ ॥

सहस्यमासशुक्लस्य प्रशस्तेऽह्नि त्रयोदशे ।
मङ्गलाचारविधिना प्रासादोयंनिवेशितः ॥ ३५ ॥

बहुनासमतीतेन कालेनान्यैश्च पार्थिवैः ।
व्यशीर्यतैकदेशोऽस्य भवनस्यततोऽधुना ॥ ३६ ॥

स्वयशोवृद्धयेसर्वमत्युदारमुदारया ।
संस्कारितमिदं भूयः श्रेण्या भानुमतो गृहम् ॥ ३७ ॥

अत्युन्नतमवदातंनभःस्पृशन्निव मनोहरैश्शिखरैः ।
शशिभान्वोरभ्युदये स्वमलमयूखायतनभूतम् ॥ ३८ ॥

वत्सरशतेषु पंचसु विंशत्यधिकेषुनवसु चाब्देषु ।
यातेष्वभिरम्यतपस्यमासशुक्लद्वितीयायाम् ॥ ३९ ॥

स्पष्टैरशोकतरुकेतकसिन्दुवारलोलातिमुक्तकलतामदयन्तिकानाम् ।
पुष्पोद्गमैरभिनवैरधिगम्यनूनमैक्यं विजृम्भितशरेहरपू (धू) तदेहे ४०

मधुपानमुदितमधुकरकुलोपगीतनगणैकपृथुशाखे ।
कालेनवकुसुमोद्गमदन्तुरकान्तप्रचुररोध्रे ॥ ४१ ॥

शशिनेवनभो विमलं कौस्तुभमणिनेवशार्ङ्गिणोवक्षः ।
भवनवरेणतथेदं पुरमखिलमलंकृतमुदारम् ॥ ४२ ॥

very imp

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

अमलिनशशिलेखा दन्तुरोपङ्गलाना-
म्परिबिहृति समूहं यावदीशो जटानाम् ।
विकटकमलमालामंससक्तांचशार्ङ्गी
भवनमिदमुदारंशाश्वतंतावदस्तु ॥ ४३ ॥

श्रेरायादेशेनभक्त्या च कारितंभवनंरवेः ।
पूर्वाचेयंप्रयत्नेन रचितावत्सभट्टिना ॥ ४४ ॥

स्वस्तिकर्तृलेखकवाचकश्रोतृभ्यः सिद्धिरस्तु ॥

XIX.

Eran Stone Pillar Inscription of Budhagupta. Year 165.

जयति विभुश्चतुर्भुजश्चतुरार्णवैविपुलसालिलपर्यङ्कः ।
जगतः स्थित्युत्पत्तिन्य (यादि) हेतुर्गरुडकेतुः ॥ १ ॥

शते पंचषष्ट्यधिकेवर्षाणां भूपतौ च बुधगुप्ते ।
आषाढमासशुक्लद्वादश्यां सुरगुरोर्दिवसे ॥ २ ॥
सं० १००—६०—५ ॥

कालिन्दीनर्मदयोर्मध्यं पालयतिलोकपालगुणैर्जगति ।
महाराजश्रि यमनुभवति सुरश्मिचन्द्रे च ॥ ३ ॥

अस्यां संवत्सरमासदिवसपूर्वायां तिथौ स्वकर्म्माभिरतस्यक्रतुयाजिनः अधीतस्वाध्यायस्य विप्रर्षैर्मैत्रायणीयवृषभस्यैंद्रविष्णाः प्रपौत्रेण- पितुर्गणानुकारिणो वरुणविष्णोः पौत्रेण पितरमनुजातस्य स्ववंशवृद्धिहेतोर्हरिविष्णोः पुत्रेणात्यन्तभगवद्भक्तेनविधातुरिच्छया स्वयंवरयेवराजलक्ष्म्याधिगतेत चतुरसमुद्रपर्य्यन्तप्राथितयशसा अक्षीणमानधनेनानैकशत्रुसमराजिष्णुना महाराजमातृविष्णुना तस्यैवानुजेन तदनुविधायिना तत्प्रसादपरिगृहीतेन धन्यविष्णुना च

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

मातापित्रोः पुण्याप्यायनार्थमेषभगवतः पुण्यजनार्दनस्य
ध्वजस्तम्भोऽभ्युच्छ्रितः।
स्वस्त्यस्तु गोब्राह्मणपुरोगाभ्यः सर्वप्रजाभ्य इति ॥

XX.

Eran Posthumous Stone Pillar Inscriptjon of Goparāja. Year 191.

ओं संवत्सरशतेएकनवत्युत्तरे श्रावणबहुलपक्षसप्तम्यां
१००—६०—१ श्रावण वदि ७॥
[–] ल (?) क्षवंशादुत्पन्नो [– –] राजेति विश्रुतः।
तस्य पुत्रोतिविक्रान्तो नाम्नाराजाऽथमाधवः ॥ १ ॥
गोपराजः सुतस्तस्य श्री मान् विख्यातपौरुषः।
शरभराजदौहित्रः स्ववंशतिलकोऽधुना ॥ २ ॥
श्री भानुगुप्तोजगतिप्रवीरो राजा महान् पार्थसमोऽतिशूरः।
तेनार्थसार्धं त्विहगोपराजो मित्रानुव (?) त्या (?) र (?) किलानुयातः ३
कृत्वातुयुद्धं सुमहत्प्रकाशं स्वर्गंगतोदिव्यनरेन्द्रकल्पः।
भक्तानुरक्ता च प्रिया च कान्ता भार्य्यावलग्नानुगताऽग्निराशिम ॥४।

XXI.

Khoh Copper Plate Inscription of the Maharaj Hastin.

The Year 156.

FIRST PLATE.

नमो महादेवाय। स्वस्ति शतपंचशतोत्तरेऽब्दशते गुप्तनृपराज्य-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भुक्तौ महावैशाखसम्वत्सरे कार्त्तिकमासशुक्लपक्षतृतीयायाम-स्यान्दिवस पूर्वायाम् तिथौ नृपति परिव्राजककुलोत्पन्नेन महाराजदे-वाढ्यप्रनप्त्रा महाराजप्रभंजननप्त्रेण महाराजदामोदरसुतेन गोसह-स्रहस्त्यश्वहिरण्यानेकभूमिप्रदेन गुरुपितृमातृपूजातत्परेणात्यन्त-देवब्राह्मणभक्तेनानेकसमरशतविजयिना स्ववंशामोदकरेण महाराज श्रीहस्तिनास्वपुण्याप्यायनार्थमात्मानस्वर्गसोपानपंक्तिभिरारोपयता ब्रा-ह्मणवाजसनयमाध्यान्दिनकौत्ससगोत्रगोपस्वामीभवस्वामी सन्ध्या-पुत्रदिवाकरदत्तभास्करदत्तसूर्य्यदत्तेभ्यो वसुन्तरशण्डिकग्रामोऽति-सृष्टः ॥ समन्ताद्वर्त्ता उत्तरे पश्चिमेन ॥

SECOND PLATE.

पूर्वभुक्ता मर्य्यादाः ॥ संध्यापुत्रप्रमुखानां सोद्रङ्गः सोपरिकरः अचाटभटप्रवेश्यः चोरवर्ज्जम् । तदस्मत् कुलोत्थैः मत्पादपिंडोपजी-विभिर्व्वाकालान्तरेष्वपि न व्याघातः कार्य्यः । एवमाज्ञापितेयोऽन्य-थाकुर्य्यात् तमहं देहान्तरगतोऽपि महतावध्यानेन निर्दहेयमुक्तं च भगवता परमर्षिणावेदव्यासेन ।

पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्षयुधिष्ठिर ।
महीं महिमतांश्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ १ ॥

बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्य यदा भूमिस्तस्य तस्यतदा फलम् ॥ २ ॥

षष्टिम्वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेता चानुमन्ता च तान्येव नरके वसेत् ॥ ३ ॥ इति ॥

लिखितं च वक्रामात्य (प्र) नप्त्रा भोगिकामात्यनरदत्तनप्त्रा भोगिकरविदत्तपुत्रेण सूर्य्यदत्तेनेति दूतको भाग्रहः ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XXII.

Khoh Copper Plate Inscription of the Maharaj Hastin.

The Year 163.

First Plate.

नमो महादेवाय । स्वास्ति त्रिषष्ठ्युत्तरेऽब्दशते गुप्तनृपराज्यभुक्तौ महाश्वयुजसंवत्सरे चैत्रमासशुक्लपक्षद्वितीयायामस्यान्दिवस पूर्वायांतिथौ नृपतिपरिव्राजककुलोत्पन्नेन महाराज देवाढ्ययनप्रनप्त्रा महाराजश्रीप्रभंजननप्त्रा महाराजदामोदरसुतेनगोसहस्रहस्त्यश्वहिरण्यानेकभूमिप्रदेन गुरुपितृमातृपूजातत्परेणात्यन्तदेवब्राह्मणभक्तेन नैकसमरशतविजयिना स्ववंशामोदकरेण महाराज श्री हस्तिना स्वपुण्याप्यायनार्थमग्निस्वामिपुत्रभरद्वाजसगोत्र वाजसनेयसब्रह्मचारिणे देवस्वामिने सर्वस्वामिने च गोरिस्वामिने वाजसनेयसब्रह्मचारिणे कौत्ससगोत्रायदिवाकरस्वामिने च स्वातिस्वामिने वाजसनेयसब्रह्मचारिणे भार्गवसगोत्रायवरुणशर्म्मणः वप्पस्वामिने वासुलसगोत्रायकठसब्रह्मचारिणे कुमारदेवदवाये वाजसनेयसब्रह्मचारिणे मातृशर्म्मा नागशर्म्मा रुखरदेवकौद्रवदेव विष्णुदेव

Second Plate.

देवनागकुमारसेनरुद्रशर्म्मदेवदाङ्गिरःलम्बोष्ठदेवमित्रमहादेव गुंठक इत्येवमादिभ्योब्राह्मणेभ्योत्तरे पट्टेकोर्परिकाग्राहारः सोद्रङ्गः सोपरिकरः अचाटभटप्रवेश्योतिसृष्टस्तस्याघाताःपूर्वेण कोर्परगर्ता। उत्तरेण।निमुक्तककोणकः वङ्गरग्रामकस्यद क्षिणपार्श्वे वलकमध्यमवृक्कः अम्रातसंम्रातरक। पाश्चिमने नागसरी । दक्षिणेन वलवर्म्मपरिच्छेदः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

तदस्मत्कुलोत्थैर्मत्पादपिंडोपजीविभिर्व्वा कालान्तरेष्वपिनव्याघातः कार्य्यः।

एवमाज्ञापिते योऽन्यथाकुर्यात् तमहं देहान्तरगतोऽपि महतावध्यानेन निर्द्देहेयम्। उक्तं च भगवता परमर्षिणा वेदव्यासेन।

पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्षयुधिष्ठिर।
महीं महिमतांश्रेष्ठ दानाच्छ्रेयोनुपालनम्॥ १॥
वहुभिर्वसुधाभुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्यतस्य तदा फलम्॥२॥
स्वदत्तांपरदत्तां वा योहेरतवसुन्धराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सहपच्यते॥ ३॥

THIRD PLATE.

षष्टिंवर्षसहस्राणि स्वर्गे मोदतिभूमिदः।
आच्छेत्ताचानुमन्ता च तान्येवनरकेवसेत॥ ४॥

लिखितं च वक्रामात्यप्रनप्त्रा भोगिकनरदत्तनप्त्रा भोगिकरविदत्तपुत्रेण महासान्धिविग्रहिक सूर्य्यदत्तेन। भग्रहोदूतकः॥

XXIII.

Majhgawam Copper Plate Inscription of the Maharaj Hastin.

The Year 191.

नमो महादेवाय। स्वस्त्यैकनवत्युत्तरब्दशते गुप्तनृपराज्य-भुक्तौश्रीमति प्रवर्धमान महाचैत्रसंवत्सरे माघमासवहुलपक्षतृतीयायामस्यां संवत्सरमासदिवसपूर्वायामतिथौ। नृपतिपरिव्राजक कुलोत्पन्नेन महाराजदेवाढ्यप्रनप्त्रा महाराजश्रीप्रभंजननप्त्रा

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

महाराजश्री दामोदरसुतेन गोसहस्रहस्त्याश्वहिरण्यानेकभूमिप्रदेन गुरुपितृमातृपूजातत्परेणात्यन्तदेवब्राह्मणभक्तेनानेकसमरशतविजयिना स्ववंशामोदकरेण महाराजश्रीहस्तिना महादेविदेवसुखविज्ञप्त्या वालुगर्त्तो नामग्रामः पूर्वाघाटपरिच्छेदमर्यादया सोद्रङ्गः सोपरिकरोऽचाटभटप्रावेश्यः मातापित्रोरात्मनश्च पुण्याभिवृद्धये महादेविदेवसुखां च स्वर्गसोपानपंक्तिमारोपयता औपमन्यवसगोत्रेभ्यश्छन्दोगकौथुमसब्रह्मचारिभ्योऽमाभ्या ब्राह्मणेभ्यो गोविन्दस्वामिगौमिकस्वामिदेवस्वामिभ्यः पुत्रपौत्रान्वयोपभोग्यस्ताम्र शासनेनाग्राहारोऽतिसृष्टः चौरवर्ज्जम्। तदस्मत्कुलोत्थैर्मत्पादपिंडोपजीविभिर्वाकालन्तरेष्वपि न व्याघातः करणीयः॥ एवमाज्ञापिते योऽन्यथाकुर्य्यात्तमहं देहान्तरगतोऽपि महतावद्ध्यानेन निर्दहेयमुक्तं च भगवता परमर्षिणा वेदव्यासेन व्यासेन।

पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम्॥ १॥

बहुभिर्वसुधाभुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदा भूमिस्तस्यतस्य तदा फलम्॥ २॥

षष्ठिं वर्ष सहस्राणिस्वर्गे मोदति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत्॥ ३॥

स्वदत्तां परदत्तां वा यो हरेत वसुन्धराम्।
स विष्ठायां कृमिर्भूत्वा पितृभिः सहमज्जते॥ ४॥

अपानीयेष्वरण्येषु शुष्ककोटरवासिनः।
कृष्णाहयोभिजायन्ते पूर्वदायं हरन्ति ये॥ ५॥

लिखितं च वक्रामात्यप्रनप्तृनप्त्रा भोगिकनरदत्तप्रनप्त्रा रवि-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

दत्तनप्त्रा सूर्यदत्तपुत्रेण महासान्धिविग्राहिकविभुदत्तेनेति ॥ महाबालाधिकृतनागसिंहो दूतकः ॥
संवत १००—६०—१ माघ दि ३ ॥

XXIV.

Bhumara Stone Pillar Inscription of the Maharajas Hastin and Sarvanatha.

स्वस्ति महादेवपादानुध्यातो महाराजहस्तिराज्ये अम्ब्लोदे महाराजसर्वनाथभोगे इन्दननप्त्रा वासुग्रामिकपुत्रीशवदासेन वलयाष्टिरुच्छ्रिता । महामाघे संवत्सरे कार्त्तिकमास दिवस १०—६ ॥

XXV.

Khoh Copper Plate Inscription of the Maharaja Samkshobha.

The year 209.

FIRST PLATE.

ओं नमो भगवते वासुदेवाय । स्वस्तिनवोत्तरेऽब्दशतद्वये गुप्तनृपराज्यभुक्तौ श्रीमति प्रवर्द्धमानविजयराज्ये महाश्वयुजसंवत्सरे चैत्रमासशुक्लपक्षत्रयोदश्यामस्यां संवत्सरमासदिवसपूर्वायाम् । चतुर्दशविद्यास्थानविदितपरमार्थस्य कपिलस्यैव महर्षेः सर्वतत्त्वस्य भरद्वाजसगोत्रस्य नृपतिपरिव्राजकसुशर्मणः कुलोत्पन्नेन महाराजश्रीदेवाढ्यपुत्रप्रनप्त्रा महाराजश्रीप्रभंजनप्रनप्त्रा महाराजश्रीदामोदरनप्त्रा गोसहस्रहस्त्याश्वहिरण्यानेकभूमिप्रदस्य गुरुपितृमातृपूजातत्परस्यात्यन्तदेवब्राह्मणभक्तस्यानेकसमरशतविजयिनः

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

रशत साष्टादशाटवीराज्याभ्यन्तरम् डहालाराज्यमन्वयागतं सपदिपालयिष्णोरनेकगुणविख्यातयशसो महाराजश्री हस्तिनसुतने वर्णाश्रमधर्मस्थापनानिरतेन परमभागवतेनात्यन्तपितृभक्तेन स्ववंशामोदकरेण महाराजश्रीसंक्षोभेण मातापित्रोरात्मनश्च पुण्याभिवृद्धये क्षोडुगोमिविज्ञाप्त्या तमेव च स्वर्गसोपान-पंक्तिमारोपयता—[Second Plate]—भगवत्याः पिष्टपुर्य्याः कारितकदेवकुलेबालि च रुसत्रोपयोगार्थम् खंडस्फुटितंसस्कारार्थं च मणिनागपीठे आपाणिग्रामस्यार्द्धम् चोरद्रोहकवर्ज्जम् ताम्र-शासनातिसृष्टम् ॥ तदस्म त्कुलोत्थैर्मत्पादपिंडोपजीविभिर्वा कालान्तरेष्वपि न व्याघातः कार्य्यः एवमाज्ञापिते योऽन्यथाकुर्यात्तमहं देहान्तरगतोऽपि महतावध्यानेन निर्द्देहेयम् ॥

उक्तंच च भगवतापरमर्षिणा वेदव्यासेन व्यासेन ।
पूर्वदत्तां द्विजातिभ्यो यत्नाद्रक्ष युधिष्ठिर ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥ १ ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः ।
यस्य यस्ययदा भूमिस्तस्य तस्य तदा फलम् ॥ २ ॥
षष्टिंवर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आक्षेप्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ३ ॥
भूमिप्रदानान्न परंप्रदानम् दानाद्विशिष्टं परिपालनंच ।
सर्वेतिसृष्टां परिपाल्य भूमिम् नृपा नृगाद्यास्त्रिदिवं प्रपन्नाः ॥ ४ ॥
लिखितं च [शासनं] जीवितनप्त्रा भुजंगदासपुत्रेश्वरदासेनेति ।

स्वमुखाज्ञा चैत्र दि २०·६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XXVI.

Karitalai Copper Plate Inscription of the Maharaja Jayanatha.

The year 174.

ओं स्वस्ति उच्छकल्पान्महाराजौघदेवस्तस्य पुत्रस्तत्पादा-
नुध्यातो महादेव्यांकुमारदेव्यामुत्पन्नो महाराजकुमारदेवस्तस्य पुत्र-
स्तत्पादानुध्यातो महादेव्याम् जयस्वामिन्यामुत्पन्नो महाराज-
जयस्वामीतस्यपुत्रस्तत्पादानुध्यातो महादेव्यांरामदेव्यामुत्पन्नो
महाराजव्याघ्रस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यामुज्झितदेव्या-
मुत्पन्नो महाराजजयनाथः कुशलीनागदेयसन्तकछन्दापल्लिकायां
ब्राह्मणादीन्कुटुम्बिनः कारुकांश्च समाज्ञापयति। विदितंवोऽस्तु यथैष-
ग्रामो मया स्वपुण्याभिवृद्धये कण्वसगोत्रवाजसनेयमाध्यन्दिनब्राह्मण
मित्रस्वामिनः सोद्रङ्गः सोपरिकरः अचाटभटप्रावेश्यः चोरवर्जितो-
तिसृष्टस्ते यूयमस्य समुचितभागभोगकरप्रत्यायोपनयनं करिष्यथ
आज्ञाश्रवणाविधेयाश्च भविष्यथ ॥ ये चास्मद्वंशोत्पद्यमानक-
राजानस्तैरियं दत्तिर्न विलोप्यानुमोदनीया समुचितराजाभाव्यकर-
प्रत्यायान ग्राह्यः ॥ यश्चैमां दत्तिंलोपयेत् स पंचभिः महापात-
कैरुपपातकैश्च संयुक्तः स्यादुक्तं च महाभारते भगवताव्यासेन ॥

स्वदत्तां परदत्तां वा यत्नाद्रक्षयुधिष्ठिर।
मही महिमतां श्रेष्ठ दानाच्छ्रेयोनुपालनम् ॥ १ ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्य यस्य यदाभूमिस्तस्य तस्य तदा फलम् ॥ २ ॥
प्रायेणहिनरेन्द्राणां वियतेनाशुभा गतिः।
पूयान्तेते तु सततं प्रयच्छन्तो वसुन्धराम् ॥ ३ ॥
षष्टिंवर्ष सहस्राणि स्वर्गे मोदति भूमिदः।
आच्छेत्ता चानुमन्ता च तान्येव नरके वसेत् ॥ ४ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आस्फोटयन्ति पितरः प्रवल्गन्ति पितामहाः ।
भूमिदाऽस्मत्कुलेजातः सनस्त्राताभविष्यति ॥ ६ ॥
सर्वसस्यसमृद्धान्तु यो हरेतवसुन्धराम् ।
श्वविष्ठायांकृमिर्भूत्वा पितृभिस्सह मज्जति ॥ ५ ॥

संवत्सरशते चतुस्सप्तते आषाढमासस्य चतुर्दशमे दिवसे अस्यांदिवसपूर्वायां तिथौ लिखितं शासनं मया भोगिलराज्यिला-मात्यनप्त्रभोगिकधुत्रदत्तपुत्रभोगिकगुंजकीर्त्तिना । दूतक उपरिक दीक्षितगृहपति स्थपतिसम्राट्चक्रर्वदत्त ।

इति ॥ संवत् १००—७—४ आषाढ दि १०—४

XXVII.

Khoh Copper Plate Inscription of the Maharaja Jayanatha.

The year 177.

[FIRST PLATE.]

ओं स्वस्ति ऊच्छकल्पान्महाराज औघदेवस्तस्य पुत्रस्तस्तत्पा-दानुध्यातो महादेव्यां कुमारदेव्यामुत्पन्नो महाराज कुमारदेवस्त-स्यपुत्रस्तत्पादानुध्यातो महादेव्यां जयस्वामिन्यामुत्पन्नो महाराज जयस्वामी तस्यपुत्रस्तत्पादानुध्यातो महादेव्यां रामदेव्यामुत्पन्नो महाराजव्याघ्रस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यामुज्झित देव्या-मुत्पन्नो महाराजजयनाथः कुशलीध्रवशारिडकायां ब्राह्मणादीन् कुटुम्बिनः कारुकांश्च समाज्ञापयति । विदितंवोऽस्तु यथैषग्रामोमया चन्द्रार्कसम कालिकः शाशातनयसर्ववाढदिविरतत्पुत्रभागवतगङ्ग-तत्पुत्रङ्कवोटाजगरदासानां स्वपुण्याभिवृद्धये भगवत्पादेभ्यः देवा-ग्राहारोतिसृष्टः ॥ एभिश्चात्रप्रतिष्ठापितक भगवत्पादानां पुत्रपौत्र प्रपौत्रतत्पुत्रादिक्रमेण खंडस्फुटित प्रतिसंस्कारेण वलिचरुसत्रप्रव-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

त्तैनाद्यनुष्ठानेन च स्वपुण्याभिवृद्धिः कर्त्तव्या । तैर्यूयमेषां समुचितशुल्कभागभोगकराहिरण्यादिप्रत्यायोपनयनम् करिष्यथाज्ञा श्रवणविधेयाश्च भविष्यथ ।

ये चास्मद् वंशोत्पद्यमानकराजानः तैरियं दत्तिर्न विलोप्यानु-मोदनीया समुचितराजाभाव्यकरप्रत्यायान ग्राह्यः [Second Plate] चोरदंडवर्ज्यम् । कालानु कालां च प्रतिपालनीया ।

यश्चैमां दत्तिंलोपयेत् स पंचभिः महापातकैरुपपातकैश्च संयुक्तः स्यात् । उक्तंच महाभारते भगवता वेद व्यासेन ॥

स्वदत्तां परदत्तां वा यत्नाद्रक्षयुधिष्ठिर ।
महीं महिमतां श्रेष्ठदानाच्छ्रेयोनुपालनम् ॥ १ ॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभि ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम् ॥ २ ॥
प्रायेणहि नरेन्द्राणां विद्यते नाशुभागतिः ।
पूयान्तेतेतुसततं प्रयच्छन्तो वसुन्धराम ॥ ३ ॥
षष्ठिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेत्ताचानुमन्ता च तान्येव नरके वसेत् ॥ ४ ॥
सर्वसस्य समृद्धान्तु योहरतवसुन्धराम् ।
श्वविष्ठायां कृमिर्भूत्वा पितृभिस्सह मज्जति ॥ ५ ॥

संवत्सरशतेसप्तसप्तत्युत्तरे चैत्रमासदिवसे द्वाविंशातिमे लिखितं शासनं भोगिक फल्गुदत्तामात्यनप्त्राभोगिकवराहादिन्नपुत्रसान्धि-विग्राहिकगल्लुना । दूतक उपरिकदीक्षितगृहपतिस्थापातिसम्राट्क-र्वदत्तः । यत्राघाताः धान्यवाहिक प्रत्युद्देशेगर्त्ता पाली च दुर्गमंडलप्रदेशे पाली । सुवर्णकत्तक प्रदेशे गोपथशरः अर्धेन च पाली । आमुकप्रदेशेगर्त्ता । दारमंडलप्रदेशेपाली । वक्रवणप्रावेश्य-मंडलप्रदेशपाली । ग्रामेयावत्कूपं प्रविष्टा इति ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XXVIII.

Khoh Copper Plate Inscription of the Maharaja Sarvanatha.

The year 193.

स्वस्ति उच्छकल्पान्महाराज औघदेवस्तस्य पुत्रस्तत्पादानुध्यातो
महादेव्यांकुमारदेव्यामुत्पन्नो महाराजकुमारदेवस्तस्य पुत्रस्तत्पा-
दानुध्यातो महादेव्यां जयस्वामिन्यामुत्पन्नो महाराजजयस्वामी-
तस्य पुत्रस्तत्पादानुध्यातो महादेव्यां रामदेव्यामुत्पन्नो महाराज
व्याघ्रस्तस्य पुत्रस्तत्पादानुध्यातो महादेव्यां ऊज्झितदेव्यामुत्पन्नो
महाराजजयनाथस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यामुरुंडदेव्या-
मुत्पन्नो महाराज सर्व्वनाथः कुशलीतमसानद्या उत्तरपारे आश्रमे
ब्राह्मणादीन् कुटुम्बिनः सर्वकारूंश्च समाज्ञापयाति । विदितंवोऽस्तु
यथैष ग्रामो मयाचन्द्रार्क समकालिकस्सोद्रंङ्गस्सोपरिकरः अचाटभट
प्रावेश्यश्चोरदंडवार्जितःचतुर्भिरंशैः प्रतिपादितः। अतोंशद्वयं विष्णु-
नन्दिनः अपरोप्यंशः स्वामिनागपुत्र वणिजसक्तिनागस्य अपरोप्यंशः
कुमारनागस्कंदनागयोः।एतत्पुत्रपौत्रप्रपौत्रतत्पुत्राद्यनुक्रमेणोपभोग्यः
ताम्रशासनेनातिसृष्टः।एभिरापि मयानुमोदितकं यथोपरिलिखितक-
क्रमेणैव स्वपुण्याभिवृद्धये स्वप्रतिष्ठापितक भगवत्पादानामादित्य-
भट्टारकपादानां च खंडस्फुटित प्रतिसंस्कारकरणाय वलिचरुसत्र-
गन्धधूपमाल्यदीपप्रवर्त्तनाय चातिसृष्टः ॥

[SECOND PLATE]

तेयूयमेषां समुचितशुल्कभागभोगकराहिरण्यकादिप्रत्यायोपनयनम्
करिष्यथाज्ञाश्रवणविधेयाश्च भविष्यथ। येचास्मद्वंशोत्पद्यमानकराजानः
तैरियं दत्तिर्न विलोप्यानुमोदनीया समुचितराजाभाव्यकरप्रत्याया-
नग्राह्यः । चोरदंडवर्ज्यम् कालानुकालां च प्रतिपालनीया ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

यश्चैमां दत्तिंलोपयेत् स पंचभिः महापातकैरुपपातकैश्च संयुक्तः स्यात्।

उक्तं च महाभारते भगवता वेद व्यासेन व्यासेन।
स्वदत्तांपरदत्तां वा यत्नाद्रक्षयुधिष्ठिर॥
महीं महिमतां श्रेष्ठ दानच्छ्रेयोनुपालनम्॥ १॥
बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः।
यस्ययस्ययदा भूमिस्तस्यतस्यतदा फलम्॥ २॥
प्रायेणहिनरेन्द्राणां विद्यतेनाशुभा गतिः।
पूयान्ते तेतु सततंप्रयच्छन्तोवसुन्धराम्॥ ३॥
षष्ठिंवर्षसहस्राणि स्वर्गे मोदतिभूमिदः।
आच्छेत्ताचानुमन्ताच तान्येव नरके वसेत्॥ ४॥
सर्वसस्य समृद्धान्तुयोहरेत वसुन्धराम्।
श्वविष्ठायांकृमिर्भूत्वापितृभिः सहमज्जति॥ ५॥

लिखितंशासनं संवत्सरशतेत्रिनवत्युत्तरे चैत्रमासदिवसेदशमे-भोगिकफल्गुदत्तामात्यनप्त्रा भोगिकवराहदिन्नपुत्रामहासान्धिविग्रहिकमनोरथेन॥ दूतको महाबलाधिकृतक्षत्रियशिवगुप्तः॥

XXIX.

Khoh Copper Plate Inscription of the Maharaja Sarvvanatha.

ओं स्वस्ति ऊच्छकल्पान्महाराज औघदेवस्तस्यपुत्रस्तत्पादनुध्यातो महादेव्यां कुमारदेव्यामुत्पन्नो महाराजकुमारदेवस्तत्पुत्रस्तत्पादानुध्यातो महादेव्यां जयस्वामिन्यामुत्पन्नो महाराजजयस्वामीतस्य पुत्रस्तत्पादानुध्यातो महादेव्यां रामदेव्यामुत्पन्नो महाराजव्याघ्रस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यामुज्झितदेव्यामुत्पन्नो मुत्पन्नो महाराजयनाथस्तस्यपुत्रस्तस्य पादानुध्यातो महादेव्या मुरुंडदेव्या-महाराजसर्वनाथः कुशलीवोटसन्तिकधवषंडिकाधें ब्राह्मणादीन

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

कुटुम्बिनस्सर्वकारूंश्च समाज्ञापयति । विदितंवोस्तु यथैष ग्रामार्धोमयाचन्द्रार्कसमकालिकस्सोद्रंङ्गः सोपरिकरः अचाटभट-प्रावेश्यः सर्वकरत्यागः सोत्पद्यमानकप्रत्यायसमेतः क्रोडुगोमिकाय-एतत्पुत्रपौत्रप्रपौत्रतत्पुत्रद्यनुक्रमेणोपभोग्यः ताम्रशासनेनातिसृष्टः। अनेनापि मयानुमोदितंयथोपरिलिखितकक्रमेणैव भगवत्याः पिष्ट पुरिकादेव्याः खंडस्फुटित प्रति संस्कारकरणायवलिचरुसत्रप्रवर्त्तनाय चातिसृष्टस्ते यूयमेषां समुचित भागभोग करहिरण्यादि प्रत्यायोप-नयनम् । ये चास्मद्वंशो त्पद्यमानकराजानस्तैरियं दत्तिर्न्न विलोप्यानुमोदनीया ॥

(The Second Plate of this grant is not forth-coming.)

XXX.

Khoh Copper Plate Inscription of the Maharaja Sarvanatha.

The year 197.

(The fisrt plate of this grant is not forth-coming.)

SECOND PLATE.

यथाकालं च प्रतिपालनीया । समुचितराजाभाव्यकरप्रत्याया-श्चनग्राह्याः । य इमां दत्तिंलोपयेत् स पंचभिर्महापातकैरुपपातकैश्च संयुक्तःस्यादुक्तं च महाभारते भगवता वेदव्यासेन व्यासेन ।

स्वदत्तां परदत्तां वा यत्नाद्रक्ष युधिष्टिर ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥ १ ॥
वहुभिर्वसुधा भुक्ता राजाभिः सगरादिभिः ।
यस्य यस्य यदाभूमिस्तस्य तस्यतदाफलम् ॥ २ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

प्रायेणहि नरेन्द्राणां विद्यतेनाशुभागतिः ।
पूयान्ते तेतु सततं प्रयच्छन्तोवसुन्धराम् ॥ ३ ॥

षष्टिं वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेत्ताचानुमन्ता च तान्येव नरके वसेत् ॥ ४ ॥

सर्वसस्यसमृद्धान्तु यो हरेतवसुन्धराम् ।
श्वविष्ठायां कृमिर्भूत्वा पितृभिः सहमज्जति ॥ ५ ॥

लिखितं शासनम् संवत्सरशते सप्तनवत्युत्तरे अश्वयुजमास दिवसे विंशतिमे भोगिकफल्गुदत्तामात्यनप्त्रा भोगिकवराहदिन्नपुत्रेण महासान्धिविग्रहिकमनोरथेन । दूतकः महाबलाधिकृतशिवगुप्तः । हलिराकरकुम्भदण्डप्रतिमोचनातिलेखिनेऽपि दूतकः उपरिक मातृशिवः ॥

XXXI.

Khoh Copper Plate Inscription of the Maharaja Sarvanatha.

The year 214.

ओं स्वस्त्युच्छकल्पान्महाराजौघदेवस्तस्य पुत्रस्तत्पादानुध्यातो महादेव्यां कुमारदेव्यामुत्पन्नो महाराजकुमारदेवस्तस्य पुत्रस्तत्पादानुध्यातो महादेव्यां जयस्वामिन्यामुत्पन्नो महाराजजयस्वामी तस्य पुत्रस्तत्पादानुध्यातो महादेव्यां रामदेव्यामुत्पन्नो महाराजव्याघ्रस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यामुज्झितदेव्यामुत्पन्नो महाराज जयनाथस्तस्यपुत्रस्तत्पादानुध्यातो महादेव्यां मुरुंडस्वामिन्यामुत्पन्नो महाराजसर्वनाथः कुशलीमणिनागपीठे व्याघ्रपल्लिककाचरपल्लिकग्रामयोर्ब्राह्मणादीन् प्रतिवासिनः समाज्ञापयति । विदितंवोऽस्तु यथैतौ ग्रामौ मया सोद्रङ्गौ सोपरिकरौ अचाटभटप्रावेश्यौ राजाभा-

Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

व्यसर्वकरप्रत्ययोत्पन्नकोत्पाद्यमानकसमेतौ आचन्द्रार्क समका-
लिकौ चोरदण्डवार्जितौ पुलिन्दभटस्यप्रसादीकृतौ तेनापि मानपुरे
कारितकदेवकुले भगवत्याःपिष्टपुरिकादेव्याः पूजानिमित्तं खंडस्फु-
टितप्रतिसंस्कारणाय च कुमारस्वामिने पुत्रपौत्रान्वयोपभोज्यौ
प्रतिपादितौ । मयापि भूमिच्छिद्रन्यायेन ताम्रशासनेनानुमोदितौ ।
ते यूयमेवोपलभ्याज्ञाश्रवणाविधेया भूत्वा समुचितभोगभागकर-
हिरण्यावातादिप्रत्यायानुपनेष्यथ । [Second Plate] ये
चास्मद्वंशोत्पद्यमानकराजानस्तौरियं दत्तिर्नविलोप्यानुमोदनीया ।
समुचितराजाभाव्यकरप्रत्यायानग्राह्यः । चोरदंडवर्ज्यम् । कालानु-
कालां च प्रतिपालनीया यश्चैमां दत्तिंलोपयेत् स पंचभिः महापात-
कैरुपपातकैश्च संयुक्तः स्यात् । उक्तं च महाभारते शतसाहस्र्यां
संहितायां परमर्षिणा पराशरसुतेन वेद व्यासेन व्यासेन ।

स्वदत्ता परदत्तां वा यत्नाद्रक्ष युधिष्टिर ।
महीं महिमतां श्रेष्ठ दानाच्छ्रेयोऽनुपालनम् ॥ १ ॥

बहुभिः वसुधा भुक्ताराजभिः सगरादिभिः ।
यस्य यस्य यदाभूमिस्तस्यतस्यतदाफलम् ॥ २ ॥

प्रायेणहिनरेन्द्राणां नाशुभाविद्यते गतिः ।
पूयन्ते तेतु सततं प्रयच्छन्तोवसुन्धराम् ॥ ३ ॥

षष्ठि वर्षसहस्राणि स्वर्गे मोदति भूमिदः ।
आच्छेत्ताचानुमन्ता च तान्येव नरके वसेत् ॥ ४ ॥

सर्वसस्य समृद्धान्तु यो हरेतवसुन्धराम् ।
श्वविष्ठायां कृमिर्भूत्वा पितृभिः सहमज्जाति ॥ ५ ॥

अपानीयेष्वरण्येषु शुष्ककोटरवासिनः ।
कृष्णाहयोहिजायन्ते पूर्वदायंहरन्तिये ॥ ६ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

लिखितं शासनं संवत्सरशतद्वये चतुर्द्दशोत्तरे पौषमासदिवसेषष्ठे फल्गुदत्तामात्यप्रनप्त्रा वराहदिन्ननप्त्रा मनोरथसुतेन सान्धिविग्राहिकनाथेन ॥ दूतको धृतिस्वामिकः ॥

XXXII.

Meharauli Posthumous Iron Pillar Inscription of Chandra.

यस्योद्वर्त्तयतः प्रतीपमुरसाशत्रून् समेत्यागतान्
वङ्गेष्वाहववर्तिनोभिलिखिता खड्गेन कीर्त्तिर्भुजे ।
तीर्त्वा सप्त मुखानि येनसमरे सिन्धोर्ज्जिता वाल्हिका
यस्याद्याप्यधिवास्यतेजलनिधिर्व्वीर्यानिलैर्दक्षिणः ॥ १ ॥
खिन्नस्येव विसृज्य गां नरपतेर्गामाश्रितस्येतरां
मूर्त्याकर्म्मजितावनीं गतवतः कीर्त्या स्थितस्यक्षितौ ।
शान्तस्येव महावने हुतभुजो यस्य प्रतापोमहान्ना-
द्याप्युत्सृजतिप्रणाशितरिपोर्यत्नस्य शेषःक्षितिम् ॥ २ ॥
प्राप्तेनस्वभुजार्जितंच सुचिरं चैकाधिराज्यं क्षितौ
चन्द्राह्वेन समग्रचन्द्रसदृशींवक्त्रश्रियं बिभ्रता ।
तेनायं प्रणिधाय भूमिपतिना भावेन विष्णौ मतिम्
प्रांशुर्विष्णुपदेगिरौ भगवतो विष्णोर्ध्वजःस्थापितः ॥ ३ ॥

XXXIII.

Mandasor Stone Pillar Inscription of Yasodharman.

वेपान्ते यस्य भीमस्तनितभयसमुद्भ्रान्तदैत्या दिगन्ताः
शृङ्गाघातैः सुमेरोर्विघटितदृशदः कन्दरा यः करोति ।
उक्षाणं तं दधानः क्षितिधरतनयादत्तपंचाङ्गुलांकम्
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसि केतु ॥१॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आविर्भूतावलेपैरविनयपटुभिर्लङ्घिताचारमार्गै-
र्मोहादैदं युगीनैरपशुभरतिभिः पीड्यमाना नरेन्द्रैः ।
यस्य क्ष्मा शार्ङ्गपाणेरिव कठिनधनुर्ज्याकिणाङ्कप्रकोष्ठम्
बाहुं लोकोपकारव्रतसफलपरिस्पन्दधीरं प्रपन्ना ॥ २ ॥
निन्द्याचारेषु योऽस्मिन् विनयमुषि युगे कल्पनामात्रवृत्त्या
राजास्वन्येषु पांसुष्विव कुसुमबलिर्नावभासे प्रयुक्तः ।
स श्रेयो धाम्नि सम्राडिति मनुभरतालर्कमान्धातृकल्पे
कल्याणे हेम्नि भास्वान् मणिरिव सुतरां भ्राजते यत्र शब्दः ॥३॥
ये भुक्ता गुप्तनाथैर्न सकलवसुधाक्रान्तिदृष्टप्रतापै-
र्नाज्ञा हूणाधिपानां क्षितिपतिमुकुटाध्यासिनी यान् प्रविष्टा ।
देशांस्तान्धन्वशैलद्रुमगहनसरिद्वीरबाहूपगूढान्
वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञया यो भुनक्ति ॥ ४ ॥
आ लौहित्योपकण्ठात्तलवनगहनोपत्यकादा महेन्द्रा-
दागङ्गाश्लिष्टसानोस्तुहिनशिखरिणः पश्चिमादा पयोधेः ।
सामन्तैर्यस्य बाहुद्रविणहृतमदैः पादयोरानमद्भि-
श्चूडारत्नांशुराजिव्यतिकरशबला भूमिभागाः क्रियन्ते ॥ ५ ॥
स्थाणोरन्यत्र येन प्रणतिकृपणतां प्रापितं नोत्तमाङ्गम्
यस्याश्लिष्टो भुजाभ्यां वहति हिमगिरिर्दुर्गशब्दाभिमानम्
नीचैस्तेनापि यस्य प्रणतिभुजबलावर्जनाक्लिष्टमूर्ध्ना
चूडापुष्पोपहारैर्मिहिरकुलनृपेणार्चितं पादयुग्मम् ॥ ६ ॥
गामेवोन्मातुमूर्ध्वं विगणयितुमिव ज्योतिषां चक्रवालम्
निर्देष्टुं मार्गमुच्चैर्दिव इव सुकृतोपार्जितायाः स्वकीर्त्तेः ।
तेनाकल्पान्तकालावधिरवनिभुजा श्रीयशोधर्म्मणायम्
स्तम्भः स्तम्भाभिरामस्थिरभुजपरिघेनोच्छ्रितिं नायितोऽत्र ॥७॥
श्लाघ्ये जन्मास्य वंशे चरितमघहरं दृश्यते कान्तमस्मिन्
धर्म्मस्यायं निकेतश्चलति नियमितं नामुना लोकवृत्तम् ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

इत्युत्कर्षं गुणानां लिखितुमिव यशोधर्म्मणश्चन्द्रविम्बे
रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमान् यः पृथिव्या विभाति ॥८॥
इति तुष्टूषया तस्य नृपतेः पुण्यकर्म्मणः ।
वासुलेनोपरचिताः श्लोकः कक्कस्य सूनुना ॥ ६ ॥
उत्कीर्णा प्रशस्तिर्गोविन्देन ॥

XXXIV.

Mandasor Duplicate Stone Pillar Inscription of Yasodharman.

....दत्त पंचाङ्गुलाङ्कम् ।
द्राघिष्ठः शूलपाणेः क्षपयतु भवतां शत्रुतेजांसिकेतुः ।
....ज्याकिणांक प्रकोष्ठम् ।
वाहुंलोकोपकारव्रतसफल परिस्यन्द धीरं प्रपन्ना ॥ १ ॥
....आलर्क मान्धात्रिकल्पे ।
कल्याणे हेम्निभास्वान् मणिरिवसुतरां भ्राजतेयत्रशब्दः
....वीरवाहूपगूढान् ।
वीर्यावस्कन्नराज्ञः स्वगृहपरिसरावज्ञयायो भुनाक्ति ॥ २ ॥
....पादयोरानमद्भिः
चूडारत्नांशुराजिव्यतिकरशवला भूमिभागः क्रियन्ते ॥
....आवर्जनक्लिष्टमूर्ध्ना ।
चूडापुष्पोपहारैर्म्मिहिरकुलनृपेणार्च्चितं पादयुग्मम् ॥ ३ ॥
....श्री यशोधर्मणायं ।
स्तम्भः स्तम्भाभिरामास्थिर भुजपरिघेणोच्छ्रितं नायितात्र ।
....यशोधर्म्मणश्चन्द्राविम्बे ।
रागादुत्क्षिप्त उच्चैर्भुज इव रुचिमान् यः पृथिव्या विभाति ॥ ४ ॥
....................कक्कस्यसूनूना ॥ उत्कीर्णा प्रशस्तिः गोविन्देन ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XXXV.

Mandasor Stone Inscription of Yasodharman and Vishnuvardhana.

The Malava year 589.

सिद्धम् ॥

सजयतिजगतांपतिः पिनाकी
स्मितरवगीतिषु यस्य दन्तकान्तिः ।
द्युतिरिव तडितं निशिस्फुरन्ती
तिरयति च स्फुटयत्यदश्च विश्वम् ॥ १ ॥

स्वयम्भूर्भूतानां स्थितिलय समुत्पत्तिविधिषु
प्रयुक्तो येनाज्ञां वहतिभुवनानां विधृतये ।
पितृत्वंचानीतो जगति गरिमानं गमयता
सशम्भुर्भूयांसि प्रतिदिशतु भद्राणिभवताम् ॥ २ ॥

फणिमणिगुरुभाराक्रान्तिदूरावनाम्रम्
स्थगयति रुचमिन्दोर्मडलं यस्य मूर्ध्नाम् ।
स शिरसि विनिबध्नं रन्ध्रिणीमस्थिमालाम्
सृजतु भवसृजो वः क्लेशभङ्गं भुजङ्गः ॥ ३ ॥

षष्ठ्या सहस्रैः सगरात्मजानां खातः खतुल्यां रुचमादधानः ।
अस्योद पानाधिपतेश्चिराय यशांसि पायात्पयसां विधाता ॥ ४ ॥

अथ जयति जनेन्द्रः श्री यशोधर्म्मनामा
प्रमदवनमिवान्तः शत्रुसैन्यं विगाह्य ।
व्रणकिसलयभङ्गैर्योऽङ्गभूषां विधत्ते
तरुणतरुलतावद्वीरकीर्त्तिर्विनाम्य ॥ ५ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

आजौजिती विजयतेजगती पुनश्च श्री विष्णुवर्धननराधिपतिः स्वएव।
प्रख्यात औलिकरलांछन आत्मवंशो येनोदितोदितपदं गमितो गरीयः६
प्राचो नृपान् सुवृहतश्चवहूनुदीचः साम्नायुधा च वशगान् प्रविधाय येन।
नामापरंजगतिकान्तमदो दुरापं राजाधिराजपरमेश्वर इत्युदूढम् ।७।

स्निग्धश्यामाम्बुदाभैः स्थगितदिनकृतो यज्वनामाज्यधूमै-
रम्भोमेध्याम् मघोनावधिषुविदधता गाढ सम्पन्न सस्याः।
संहर्षाद्वाणिनीनां कररभसहृतोद्यान चूताङ्कुराग्रा
राजान्वन्तो रमन्ते भुजविजितभुवा भूरयोयेनदेशाः ॥ ८ ॥

यस्योत्केतुभिरुन्मदद्विपकरव्याविद्धलोध्रद्रुमै-
रुद्धूतेनवनाध्वनि ध्वनिनदद्विन्ध्याद्रिरन्ध्रैर्वलैः।
वालेयच्छविधूमरेणुरजसा मन्दांशु संलक्ष्यते
पर्यावृत्तशिखंडिचन्द्रक इव ध्यामं रवेर्मंडलम् ॥ ९ ॥

तस्य प्रभोर्वंशकृतांनृपाणां पादाश्रयाद्विश्रुत पुण्यकीर्त्तिः।
भृत्यः स्वनैभृत्यजितारिषट्क आसीद्वसीयान्किलषष्ठिदत्तः१०

हिमवत इवगाङ्गस्तुङ्गनाम्नः प्रवाहः
शशभृत इव रेवावारिराशिः प्रथीयान्।
परमभिगमनीयः शुद्धिमानन्ववायो
यत उदित गरिम्नस्तायतेनैगमानाम् ॥ ११ ॥

तस्यानुकूलः कुलजात्कलत्रात्सुतः प्रसूतोयशसां प्रसूतिः।
हरेरिवांशंवशिनं वराहम वराहदासंयमुदाहरन्ति ॥ १२ ॥

सुकृतिविषयतुङ्गं रूढमूलंधरायाम्
स्थितिमपगतभङ्गां स्थेयसीमादधानम्।
गुरुशिखरमिवाद्रेस्तत्कुलं स्वारमभूत्या
रविरिवरविकीर्तिः सुप्रकाशंव्यधत्त ॥ १३ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

विभ्रता शुभ्रमभ्रांशि स्मार्त्तं वर्त्मोचितम् शतम् ।
न विशंवदितायेन कलावपिकुलीनता ॥ १४ ॥
धुतधीदीधितिध्वान्ता हविर्भुज इवाध्वरान् ।
भानुगुप्तातत: साध्वी तनयांस्त्रीनजीजनत् ॥ १५ ॥
भगवद्दोषइत्यासीत् प्रथमः कार्य्यवर्त्मसु ।
आलंबनं बांधवानामन्धकानां इवोद्धवः ॥ १६ ॥
बहुनयविधिवेधा गह्वरेप्यर्थमार्गे
विदुरइवविदूरं प्रेक्षयाप्रेक्षमाणाः ।
वचन रचनवन्धे संस्कृतप्राकृतेयः
कविभिरुदितरागंगीयते गीराभिज्ञः ॥ १७ ॥
प्रणाधिदृगनुगन्त्रा यस्यवौद्धेन चान्दणा
न निशि तनुदवीयोवास्त्यदृष्टंधरित्र्याम् ।
पदमुदयिदधानोनन्तरं तस्यचाभूत्
सभयमभयदत्तोनामचिन्त्यप्रजानाम् ॥ १८ ॥
विन्ध्यास्यावन्ध्यकर्म्मा शिखरतटपतत्पांडुरेवाम्बुराशे-
र्गोलाङ्गूलैः सहेलं प्लुतिनमिततरोः पारियात्रस्यचाद्रेः ।
आसिन्धोरन्तरालं निजशुचि सचिवाध्यासितानेकदेशस
राजस्थानीयवृत्त्या सुरगुरुरिव यो वर्णिनांभूतयेपात् ॥१६॥
विहित सकलवर्णासंकरंशान्तडिम्बम
कृतामवकृतमेतद्‌येन राज्यं निराधि ।
स धुरमयमिदानीं दोषकुम्भस्य सूनु-
र्गुरुवहति तदूढाम् धर्म्मतो धर्म्मदोषः ॥ २० ॥
स्वसुखमनतिवांछान्दुर्गमेध्वन्यसंगाम्
धुरमतिगुरुभारांयोदधद्भर्त्तुरर्थे ।
वहातिनृपतिवेशं केवलंलक्ष्ममात्रम्
वलिनमिवविलम्वं कम्बलंवाहुलेयः ॥ २१ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उपहिताहितरक्षा मंडनोजातिरत्नै-
भुँजइव पृथुलांसस्तस्यदक्षः कनीयान् ।
महदिदमुदपानं खानयामासविभ्र-
च्छ्रुतिहृदयनितान्तानन्दिनिर्दोषनाम ॥ २२ ॥
सुखाश्रेयच्छायं परिणतिहितस्वादुफलदम्
गजेन्द्रेणारुग्णंद्रुममिवकृतान्तेन बलिना ।
पितृव्यंप्रोदिश्यप्रियमभयदत्तंपृथुधिया
प्रथीयस्तेनेदं कुशलमिहकर्म्मोपरचितम् । २३ ॥
पंचसुशतेषुशरदां यातेष्वेकान्नवति सहितेषु ।
मालवगणस्थितिवशात् कालज्ञानाय लिखितेषु ॥ २४ ॥
यस्मिन्कालेकलमृदुगिरां कोकिलानां प्रलापा
भिन्दन्तीव स्मरशरनिभाः प्रोशितानां मनांसि ।
भृङ्गालीनां ध्वनिरनुवनं भारमन्द्रश्च यस्मि
न्नाधूतज्यंधनुरिवनदच्छ्रूयते पुष्पकेतोः ॥ २५ ॥
प्रियतमकुपितानां रामयन्बद्धरागम्
किसलयमिवमुग्धं मानसम्मानिनीनाम् ।
उपनयति नभस्वान्मानभङ्गायचास्मिन्
कुसुमसमयमासे तत्र निर्म्मापितोऽयम् ॥ २६ ॥
यावत्तुङ्गैरुदन्वान् किरणसमुदयं सङ्क्रान्तं तरङ्गै-
रालिङ्गश्चिन्दुबिम्बं गुरुभिरिव भुजैः संविधत्ते सुहृत्ताम् ।
बिभ्रत्सौधान्तलेखावलयपरगतिं मुंडमालामिवायम्
सत्कूपस्तावदास्तामसृत समरसस्वच्छविष्यन्दिताम्बुः २७
श्रीभान्दत्तोददक्षिणः सत्यसन्धो ह्रीमांश्छूरोवृद्धसेवी कृतज्ञः ।
बद्धोत्साहः स्वामिकार्य्येष्वखेदी निर्दोषोऽयं पातुधर्म्मंचिराय ॥२८
उत्कीर्णं गोविन्देन ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

XXXVI.

Eran Stone Boar Inscription of Toramana.

ओं ।

जयति धरग्युद्धरणे घनघोराघातघूर्णितमहीध्रः ।

देवोवराहमूर्तिस्त्रैलोक्यमहागृहस्तम्भः ॥ १ ॥

वर्षे प्रथमे पृथिवीं पृथुकीर्त्तौ पृथुद्युतौ महाराजधिराजश्री तोरमाणेप्रशासति

फाल्गुनादिवसे दशमेइत्येवं राज्यवर्षमासदिनैः ।

एतस्यां पूर्वायां स्वलक्षणैर्युक्तपूर्वायाम् तिथौ ॥ २ ॥

स्वकर्म्माभिरतस्य क्रतुयाजिनोऽधीतस्वाध्यायस्य विप्रर्षेमैत्रायणीय विषभस्येन्द्र विष्णोःपौत्रस्य पितुर्गुणानुकारिणोवरुणाविष्णोः पौत्रस्य पितरमनुजातस्य स्ववंशवृद्धिहेतोर्हरिविष्णोः पुत्रस्यात्यन्त-भगवद्भक्तस्यावधातुरिच्छया स्वंवरयेव राजलक्ष्म्याधिगतस्य चतु-स्समुद्रपर्य्यन्तप्रथितयशसः अक्षीणमानधनस्यानेकशत्रुसमर-जिष्णोः महाराजमातृविष्णोःस्वर्गतस्य भ्रात्रानुजेन तदनुविधायिना तत्प्रसादपरिगृहीतेन धन्यविष्णुना तेनैव सहाविभक्तपुण्यक्रियेण मातापित्रो पुण्यप्यानार्थमेषभगवतो वराहमूर्त्तेर्जगत्परायणस्य नारायणस्य शिलाप्रसादः स्वविषयेऽस्मिन्नैरिकिणे कारितः ॥

स्वस्त्यस्तुगोब्राह्मणपुरोगाभ्यः सर्वप्रजाभ्य ॥ इति ॥

XXXVII.

Gwalior Stone Inscription of Mihirakula.

ओम् ।

जयतिजलदवालध्वान्तमुत्सारयन् स्वैः

किरणनिवहजालैर्व्योम विद्योतयद्भिः ।

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

उदयगिरितटाग्रं मंडयन्यस्तुरङ्गैः
चकितगमनखेदभ्रान्तचंचत्सटान्तैः ॥ १ ॥
उदयगिरि [˘— —] ग्रस्तचक्रोर्तिहर्त्ता
भुवनभवनदीपः शर्वरीनाशहेतुः ।
तपितकनकवर्णैरंशुभिः पंकजानाम्
अभिनवरमणीयम् योविधत्ते सवोव्यात् ॥ २ ॥
श्री तोरमाणइतियः प्रथितो भूचक्रपः प्रभूतगुणः ।
सत्यप्रधानशौर्य्याद्येन महीन्यायतः शास्ता ॥ ३ ॥
तस्योदितकुलकीर्त्तेः पुत्रोतुलविक्रमः पतिः पृथिव्याः ।
मिहिरकुलेतिख्यातो भङ्गोयः पशुपतिं [˘— —] ॥ ४ ॥
तस्मिन् राजनिशासति पृथिवीं पृथुविमललोचनेर्तिहरे ।
अभिवर्धमानराज्ये पंचदशाब्देनृपवृषष्या ॥ ५ ॥
शशिरश्मिहासविकसितकुमुदोत्पलगन्धशीतलामोदे ।
कार्तिकमासेप्राप्ते गगनपटौ निर्म्मले भाति ॥ ६ ॥
द्विजगणमुख्यैराभिसंस्तुतेच पुण्याहनादघोषेण ।
तिथिनक्षत्रमुहूर्त्ते संप्राप्तेसुप्रशस्तदिने ॥ ७ ॥
मातृतुलस्यतुपौत्रः पुत्रश्चतथैव मातृदासस्य ।
नाम्ना च मातृचेतः पर्वत .... वास्तव्यः ॥ ८ ॥
नानाधातुविचित्रे गोयाह्वयनाम्निभूधरेरम्ये ।
कारितवान् शैलमयं भानोः प्रासादवरमुख्यम् ॥ ९ ॥
पुण्याभिवृद्धिहेतोर्मातापित्रोस्त आत्मनश्चैव ।
वसतांच गिरिवरेऽस्मिनराज्ञः......पादेन ॥ १० ॥
ये कारयन्तिभानोश्चन्द्रांशुसमंप्रभगृहप्रवरम् ।
तेषांवासः स्वर्गेयावत्कल्पक्षयो भवति ॥ ११ ॥

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भत्त्यारवेर्विरचितम् सद्धर्म्मख्यापनं सुकीर्त्तिमयम् ।
नाम्ना च केशवेति प्रथितेन च··· दित्येन॥ १२॥

यावच्छर्वजटाकलापगहने विद्योतते चन्द्रमा
दिव्यस्त्रीचरणैर्विभूषिततयो यावच्चमेरुर्नगः ।
यावच्चोरसिनीलनीरदनिभेविष्णुर्विभर्त्युज्ज्वलाम्
श्रींतावद्‌गिरिमूर्ध्नितिष्ठतिशिलाप्रसादमुख्योरमे ॥ १३ ॥

XXXVIII.

Maliya Copper Plate Inscription of the Maharaja Dharasena II.

The year 252.

ओं स्वस्तिवलभीतः प्रसभप्रणतामित्राणां मैत्रकाणामतुलबल-सम्पन्नमंडलाभोगसंसक्तसंप्रहारशतलब्धप्रतापः प्रतापोपनतदान-मानार्ज्जवोपार्ज्जितानुरागानुरक्तमौलभृतमित्रश्रेणीवलावाप्तराज्यश्रीः परममाहेश्वरः श्रीसेनापतिभट्टारकः ॥ तस्य सुतस्तत्पादरजोरुणा-वनतपवित्रीकृताशिराः शिरोवनतशत्रुचूडामणिप्रभाविच्छुरितपाद-नखपंक्तिदीधितिर्दीनानाथकृपणजनोपजीव्यमानविभवः परम-माहेश्वरः श्री सेनापतिधरसेनस्तस्यानुजस्तत्पादप्रणामप्रशस्ततर-विमलमौलिमणिर्मन्वादिप्रणीतविधिविधानधर्म्मा धर्म्मराज इव विहितविनयव्यवस्थापद्धतिरखिलभुवनमंडलाभोगैकस्वामिना परम-स्वामिनास्वयमुपाहितराज्याभिषेकः महाविश्राणनावपूतराज्य श्रीः परममाहेश्वरोमहाराजद्रोणसिंहइव। तस्यानुजः स्वभुजवलपराक्रमेण परगजघटानिकानामेकविजयी शरणैषिणां शरणमवबोद्धाशास्त्रार्थ-तत्वानां कल्पतरुरिवसुहृत् प्रणयिनां यथाभिलषितकामकलोप-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

भोगदः परमभागवतः श्री महाराजध्रुवसेनस्तस्यानुजस्तच्चरणार-विन्दप्रणति प्रविधौताशेषकल्मषः सुविशुद्धस्वचरितोदकप्रक्षालित सकलकालिकलंकः प्रसभनिर्जितारातिपक्षप्रथितमहिमा परमा-दित्यभक्तः श्रीमहाराजधरपट्टस्तस्यात्मजस्तत्पादसपर्य्यावाप्तपुण्यो-दयः शैशवात् प्रभृतिखड्गद्वितीयबाहुरेव समदपरगजघटास्फोटन-प्रकाशितसत्वनिकषः तत्प्रभावप्रणतारातिचूडारत्नप्रभासंसक्त सव्यपादनखरश्मि संहतिः सकलस्मृतिप्रणीतमार्गसम्यक् परि-पालनप्रजाहृदयरंजनादन्वर्थराजशब्दो रूपकान्तिस्थैर्य्य गांभीर्यबुद्धि संपद्भिः स्मरशशाङ्काद्रिराजोदधित्रिदशगुरुधनेशानतिशयानोभय-प्रदानपरतया तृणववदपास्ताशेषस्वकार्यफलः पादाचारीवसकल-भुवनमंडलाभोगप्रमोदः परममाहेश्वरः श्री महाराज गुहसेनः। तस्यसुतस्तस्यपादनखमयूख संतान निर्वृत्तजाह्नवीजलौघविक्षा-लिताशेषकल्मषः प्रणयिशतसहस्रोपजीव्यभोगसम्पत् रूपलोभादि-वाश्रितस्सरसमभिगामिकैर्गुणैः सहजशक्तिशिक्षाविशेष विस्मा-पिताखिलधनुर्धरः प्रथमनरपतिसमतिसृष्टानामनुपालयिता धर्म्म-दायनमपाकर्त्ता प्रजोपघातकारिणामुपप्लवनां दर्शयिता श्री सरस्वत्योरेकाधिवासस्य संहताराति [Second Plate] पक्षलक्ष्मीपरिक्षोभदक्ष विक्रमः क्रमोपसंप्राप्तविमलपार्थिव श्रीः परममाहेश्वरः महाराज श्री धरसेनः कुशली सर्वानेवायुक्त-कविनियुक्तकद्राङ्गिकमहत्तरचाटभटध्रुवाधिकरणिक दांडपाशिक-राजस्थानीयकुमारामात्यादीनन्यांश्च यथा संवध्यमानकान् समाज्ञापयत्यस्तुवः संविदितं यथामया मातापित्रोः पुण्याप्याय-नायात्मनश्चैहिकामुष्मिकयथाभिलषितफलावप्तये अन्तरत्रा-याम् शिवकपद्रके वीरसेनदन्तिक प्रत्ययपादावर्त्तशतं एतस्माद-परतः पादावर्त्तः पंचदश तथाअपर सीम्निस्कम्भसेनप्रत्य-यपादावर्त्तशतं विंशधिकंपूर्वसीम्निपादावर्त्तादासडोम्भिग्रामे पूर्व-

CC-0. In Public Domain. Funding by IKS-MoE

Digitized by eGangotri and Sarayu Trust.

PREFATORY NOTE.

Sometime ago the University of Allahabad took the long-deferred step of providing co-ordinated courses of study for the B.A. Examination. As a part of this scheme, the Gupta Inscriptions have been prescribed in co-ordination with Ancient Indian History. These Inscriptions, however, have been available only in the costly volumes published by the Archæological Department of the Government of India. As the cost of these would be beyond the means of the ordinary Indian undergraduate, the enterprising Proprietor of The Belvedere Press, undertook their publication, and through the kind intercession of the U. P. Government, secured the sanction for reprinting the Inscriptions from the Government of India. The task of seeing the publication though the Press fell to me, simply because I was the man available on the spot. I am afraid there is still left much to be desired in the way of editorial precision; for this reason, this first edition of the reprint has been limited to a very few copies, and it is hoped that the later edition will be a much improved one.

"Notes," and "Aids" have been intentionally eschewed. For these the serious student should always turn to the living professor, without whose help all "aids" are wooden and lifeless.

MUIR CENTRAL COLLEGE,
Allahabad.

GANGANATHA JHA.

Mohit

CC-0. In Public Domain. Funding by IKS-MoE